संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

श्रीवरदराजाचार्यविरचिता

लघुसिद्धान्तकौमुदी

तस्या इदं

सञ्ज्ञाप्रकरणम्

तस्य डिजिटल-संस्करणम्
प्रस्तूयते

परामर्शकौ
प्रो.ब्रजभूषणओझा
प्रो.नीलाभतिवारी

प्रस्तोता
डॉ. श्रीओमशर्मा

माहेश्वर/ प्रत्याहार-सूत्राणि — अक्षर/ वर्ण-समाम्नायः

1. अ इ उ ण्	2. ऋ ऌ क्	3. ए ओ ङ्	4. ऐ औ च्
5. ह य व र ट्	6. लँ ण्	7. ञ म ङ ण न म्	8. झ भ ञ्
9. घ ढ ध ष्	10. ज ब ग ड द श्	11. ख फ छ ठ थ च ट त व्	
12. क प य्	13. श ष स र्	14. ह ल्	

प्रत्याहार-निर्माणविधिः- प्रत्याहारः = संक्षेपः= Short Technique

अण्

अ इ उ ण्

इक्

अ इ उ ण् ऋ ऌ क्

यण्

ह य व र ट् लँ ण्

अन्त्येन इता सह उच्चार्यमाणः वर्णः = (अण् अच् हल् ..) , मध्ये= middle विद्यमानानां वर्णानां स्वस्य = self च बोधकः।

माहेश्वर/ प्रत्याहार-सूत्राणि   अक्षर/ वर्ण-समाम्नायः


1.अ इ उ ण्	2.ऋ ऌ क्	3.ए ओ ङ्	4.ऐ औ च्
5.ह य व र ट्	6.लँ ण्	7.ञ म ङ ण न म्	8.झ भ ञ्
9.घ ढ ध ष्	10.ज ब ग ड द श्	11.ख फ छ ठ थ च ट त व्	
12.क प य्	13.श ष स र्	14.ह ल्	

* **प्रत्याहाराणामकारादिक्रमेण परिसंख्या—**

१	अक्	८	अश्	१५	ऐच्	२२	जश्	२९	भष्	३६	रल्
२	अच्	९	इक्	१६	खय्	२३	झय्	३०	मय्	३७	वल्
३	अट्	१०	इच्	१७	खर्	२४	झर्	३१	यञ्	३८	वश्
४	अण्	११	इण्	१८	ङम्	२५	झल्	३२	यण्	३९	शर्
५	अण्	१२	उक्	१९	चय्	२६	झश्	३३	यम्	४०	शल्
६	अम्	१३	एङ्	२०	चर्	२७	झष्	३४	यय्	४१	हल्
७	अल्	१४	एच्	२१	छव्	२८	बश्	३५	यर्	४२	हश्

अचां = स्वराणां भेदाः

Tipes of Vowels

1. ह्रस्वः	उच्चारण-कालः १ मात्रा **(0.70 Seconds)**	
2. दीर्घः	उच्चारण-कालः २ मात्रा (01.40 Seconds)	
3. प्लुतः	उच्चारण-कालः ३ मात्रा (02.10 Seconds)	

चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम्॥ (पाणिनिशिक्षा-49)




सूत्रम्- ऊकालोऽज्झ्रस्वदीर्घप्लुतः

पदच्छेदः- ऊ-कालः अच्-ह्रस्व-दीर्घ-प्लुतः

मूलार्थः- उश्च ऊश्च ऊ३श्च= वः । वां= एकद्वित्रिमात्रिक-ऊकाराणां कालो = उच्चारणकालसदृशः कालः, यस्य सोऽच्= अ इ उ इत्यादि नव स्वराः क्रमाद् ह्रस्व[1]-दीर्घ[2]-प्लुत[3]-संज्ञः स्यात्।

स= ह्रस्वदीर्घप्लुतः अच् प्रत्येकमुदात्तादि (स्वरभेदेन) भेदेन त्रिधा(भविष्यति) = तीन प्रकार का और होगा।



संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

सूत्रम्- ऊकालो ऽज्झ्रस्वदीर्घप्लुतः

सरलार्थः- ‘उ’ इति एकमात्रिकस्य उच्चारणे यः कालः(मात्रा), तादृशः कालः यस्य अचः, सः अच् ह्रस्वसंज्ञकः। यस्य ‘ऊ’ इति द्विमात्रिकस्य उच्चारणकालसदृशः कालः, सः अच् दीर्घसंज्ञकः। यस्य च ‘ऊ३’ इतिवत् उच्चारण कालः (त्रिमात्रिकोच्चारणकालसदृशः:कालः) स अच् प्लुत संज्ञकः भवतीति ज्ञेयम्।

अ	इ	उ	ऋ	ऌ	ए	ओ	ऐ	औ
1.ह्रस्वः	1.ह्रस्वः	1.ह्रस्वः	1.ह्रस्वः	1.ह्रस्वः	1.ह्रस्वः	1.ह्रस्वः	1.ह्रस्वः	1.ह्रस्वः
2.दीर्घः	2.दीर्घः	2.दीर्घः	2.दीर्घः	2.दीर्घः	2.दीर्घः	2.दीर्घः	2.दीर्घः	2.दीर्घः
3.प्लुतः	3.प्लुतः	3.प्लुतः	3.प्लुतः	3.प्लुतः	3.प्लुतः	3.प्लुतः	3.प्लुतः	3.प्लुतः

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

अचां = स्वराणां भेदाः
Tipes of Vowels

१.ह्रस्वः > अ	इ	उ	ऋ	ऌ	X	X	X	X
२.दीर्घः > आ	ई	ऊ	ॠ	X	ए	ऐ	ओ	औ
३.प्लुतः > आ३	ई३	ऊ३	ॠ३	ॡ३	ए३	ऐ३	ओ३	औ३

⇒ अ इ उ ऋ एषां वर्णानां ह्रस्व-दीर्घ-प्लुत-भेदाः भवन्ति।

⇒ ऌ इति वर्णस्य दीर्घभेदः नास्ति ।

⇒ ए ऐ ओ औ इति वर्णानां ह्रस्व-भेदाः न सन्ति।

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

षड्जादिस्वरज्ञानम्

1.षड्जम्

पेंओ पेंओ




2.ऋषभः

अम्भैऽऽऽ



3.गान्धारम्

मैंऽऽऽ



4.मध्यमम्

टिचिटिऽ



5.पञ्चमम्

कू हू




6.धैवतम्

हिहीऽऽऽ



7.निषाद

चैंऽऽऽ



Explains That Each Sama-svara Was Derived From The Sounds Made By A Bird Or An Animal In Its Appropriate Season. For Instance; The Peacock's Cry Was Shadja (Sa), The Bulls Roar Was #Rishabha (Ri), Sheep-goat Bleat Was #Gandhara (Ga), Kraunchaka's (Heron) Cry Was#Madhyama (Ma), Koel's (Cuckoo) Melodious Whistle Was #Panchama (Pa), The Neigh Of The Horse Was #Dhaivata (Dha), Elephant's Trumpet Was#Nishadha (Ni).

षड्जं वदति मयूरो गावो रम्भन्ति चर्षभः । अजाविके तु गान्धारं क्रौञ्चो वदति मध्यमम् ॥
पुष्पसाधारणे काले कोकिलो वक्ति पञ्चमम् । अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ॥

नारदीय शिक्षा (1.5.3; 1.5.4)


संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

षड्जादिस्वर-द्वारा उदात्त-अनुदात्त-स्वरितज्ञानम्


1.षड्जम् — स्वरितः



2.ऋषभः — अनुदात्तः



3.गान्धारम् — उदात्त




4.मध्यमम् — स्वरितः




5.पञ्चमम् — स्वरितः



6.धैवतम् — अनुदात्तः



7.निषाद — उदात्त




षड्जं वदति मयूरो गावो रम्भन्ति चर्षभः ।
अजाविके तु गान्धारं क्रौञ्चो वदति मध्यमम् ॥
पुष्पसाधारणे काले कोकिलो वक्ति पञ्चमम् ।
अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ॥

उदात्ते निषादगान्धारावनुदात्त ऋषभ-धैवतौ ।
स्वरित्प्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥ (पाणिनीयशिक्षा-12)

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

वर्णानां स्थानपरिचयः



१–२. कण्ठ
३. काकलक
४. कोमलतालु
५. मूर्धा
६. तालु
७. बर्स्व (वर्त्स)
८. दन्तवेष्ट
९. दन्तमूल
१०. दन्त
११. ओष्ठ
१२. नासासुरङ्गा
१३. जिह्वामूल
१४. जिह्वामध्य
१५. जिह्वोपाग्र
१६. जिह्वाग्र
१७. मूर्धन्य श्रुति के उच्चारण के समय मूर्धा में छूने वाली जिह्वा का उलटा भाग
१८. ऊर्ध्वहनु
१९. अधोहनु

अष्टौ स्थानानि वर्णानामुरः[1] कण्ठः[2] शिर[3]स्तथा ।
जिह्वामूलं[4] च दन्ताश्च[5] नासिको[6]ष्ठौ[7] च तालु[8] च ॥ (पाणिनीयशिक्षा-13)

संस्कृतसारः छिद्यन्ते सर्वसंशयाः

पाणिनिमते उदात्त-अनुदात्तसंज्ञा

सूत्रम्- उच्चैरुदात्तः

पदच्छेदः- उच्चैस् + उदात्तः

अर्थः- ताल्वादिषु= कण्ठादि-अष्टसु स्थानेषु ऊर्ध्वभागे = शिरोभागे / मूर्धाभागे (वायोः प्रतिहतत्वेन) निष्पन्नः = उत्पन्नोऽच् उदात्तः = उदात्तसंज्ञको भवति।

सूत्रम्- नीचैरनुदात्तः

पदच्छेदः- नीचैस् + अनुदात्तः

अर्थः- ताल्वादिषु = कण्ठादि-अष्टसु स्थानेषु अधोभागे = उरोभागे (वायोः प्रतिहतत्वेन) निष्पन्नः = उत्पन्नोऽच् अनुदात्तः = अनुदात्तसंज्ञको भवति।

तत्र यदा सर्वाङ्गानुसारिप्रयत्नस्तीव्रो भवति, तदा गात्राणां निग्रहः, कण्ठबिलस्य चाऽल्पत्वं स्वरस्य वायोस्तीव्रगतित्वाद् रौक्ष्यं भवति- तमुदात्तमाचक्षते।

पाणिनीय-शिक्षासूत्रम्-२१

उसमें जब सभी अङ्गों में होने वाला प्रयत्न तीव्र होता है, गात्रों का (कण्ठविवर की तन्त्रियों का) निग्रह (कड़ापन) होता है, कण्ठविवर छोटा होता है, वायु तीव्रगतिवाला होने से स्वर की रुक्षता (तीक्ष्णता) होती है तब (उस प्रकार की उच्चारण-प्रक्रिया से उच्चरित) उस स्वर को अथवा वर्ण को उदात्त कहते हैं।

यदा मन्दः प्रयत्नो भवति तदा गात्राणां प्रसन्नत्वम्, कण्ठबिलस्य च महत्त्वं स्वरस्य च वायोर्मन्दगतित्वात् स्निग्धता भवति। तमनुदात्तमाचक्षते।

पाणिनीय-शिक्षासूत्रम्-२२

जब (सभी अङ्गों में होने वाला) प्रयत्न मन्द होता है, तब गात्रों का (कण्ठविवर की तन्त्रियों का) प्रसन्नत्व (शिथिलत्व) होता है, कण्ठविवर बड़ा होता है, वायु मन्दगति वाला होने से स्वर की स्निग्धता (अरुक्षता) होती है। तब (उस प्रकार की उच्चारण प्रक्रिया से उच्चरित) उस स्वर को अथवा वर्ण को अनुदात्त कहते हैं।

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः। स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः॥ (पाणिनीयशिक्षा-४८)

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

उदात्तानुदात्त-स्वरितानां लेखनप्रकारः

◆ उदात्तादि-स्वराणां चिह्नविशेषस्य प्रयोगः वैदिकपुस्तकेषु एव उपलभ्यते। अद्यत्वे लौकिकभाषायाम् अस्य प्रयोगः नास्ति।

◆ उदात्तस्य स्वरस्य चिह्नं Symbol न भवति। यथा—अ , इ , उ इत्यादयः।

◆ अनुदात्तस्य स्वरस्य अधोरेखा (◌॒) भवति। यथा- अ॒ , इ॒ , उ॒ इत्यादयः।

◆ स्वरितस्य स्वरस्य ऊर्ध्वरेखा (◌॑) भवति। यथा—अ॑ , इ॑ , उ॑ इत्यादयः।

वैदिकोदाहरणं यथा- ॐ शन्नो॑ दे॒वीर॒भिष्ट॑य॒ऽआपो॑ भवन्तु पी॒तये॑। शँय्योर॒भिस्र॑वन्तु नः ।

इयं स्वराङ्कन पद्धतिः यजुर्वेदस्य माध्यन्दिनशाखानुसारिणी वर्त्तते। वेदानाम् अन्यासु शाखासु इयं रीतिः सर्वत्र समाना न दृश्यते। स्वरविषये अधिकज्ञानाय पं.युधिष्ठिरमीमांसक-विरचितं 'वैदिक स्वर मीमांसा'(पृं.सं.-127) इति पुस्तकं पश्यन्तु।

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

स्वरितसञ्ज्ञा

सूत्रम्- समाहारः स्वरितः

मूलार्थः- उदात्तत्वानुदात्तत्वयोः एकत्र समाहारो सोऽच् स्वरितः।

सरलार्थः- यस्मिन् स्वरे उदात्तत्वस्य अनुदात्तत्वस्य च उभयोः वर्णधर्मयोः समाहारः भवति स अच् स्वरितसंज्ञः स्यात्।

हिन्दी में भावार्थ- उदात्त और अनुदात्त के आमिश्रण से युक्त अथवा उदात्त और अनुदात्त के अन्तराल में रहने वाला स्वर स्वरित कहलाता है।

अच् = स्वराः

1.ह्रस्वः	2.दीर्घः	3. प्लुतः
1. उदात्तः	1. उदात्तः	1. उदात्तः
2.अनुदात्तः	2.अनुदात्तः	2.अनुदात्तः
3.स्वरितः	3.स्वरितः	3.स्वरितः

अनुनासिक-सञ्ज्ञा

स = अच् नवविधोऽपि= नवप्रकारोऽपि प्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यां = अनुनासिकत्वधर्मेण अननुनासिकत्वधर्मेण (च पुनः) द्विधा= द्विप्रकारको भवति।

सूत्रम्- मुखनासिकावचनो ऽनुनासिकः

मूलार्थः- मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्।

सरलार्थः- मुखसहित-नासिकया यस्य वर्णस्य उच्चारणं भवति , तस्य वर्णस्य अनुनासिकसंज्ञा भवति। तथा केवलेन मुखेन उच्चरितः वर्णः अननुनासिकसंज्ञको = निरनुनासिकसंज्ञको भवति।

- अनुनासिकस्य चिह्नं = Symbol इदं चन्द्रबिन्दुः (ँ) अस्ति। यथा— अँ इँ उँ इत्यादयः।
- अननुनासिकस्य चिह्नं न भवति। यथा— अ इ उ इत्यादयः।

तदित्थम् - अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः। लृवर्णस्य द्वादश, तस्य दीर्घाभावात्। एचामपि द्वादश, तेषां ह्रस्वाभावात्॥

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

वर्णभेद-ज्ञापकचक्रम्

1.ह्रस्वः		2.दीर्घः		3. प्लुतः	
1. उदात्तः		1.उदात्तः		1. उदात्तः	
1.अनुनासिक	2.अननुनासिक	1.अनुनासिक	2.अननुनासिक	1.अनुनासिक	2.अननुनासिक
अँ इँ उँ ऋँ लृँ	अ इ उ ऋ लृ	आँ ईँ ऊँ ॠँ एँ ओँ ऐँ औँ	आ ई ऊ ॠ ए ओ ऐ औ	आँ३ ईँ३ ऊँ३ ॠँ३लृँ३एँ३ ओँ३ ऐँ३ औँ३	आ३ ई३ ऊ३ ॠ३लृ३ए३ ओ३ ऐ३ औ३
2.अनुदात्तः		2.अनुदात्तः		2.अनुदात्तः	
1.अनुनासिक	2.अननुनासिक	1.अनुनासिक	2.अननुनासिक	1.अनुनासिक	2.अननुनासिक
अ॒ँ इ॒ँ उ॒ँ ऋ॒ँ लृ॒ँ	अ॒ इ॒ उ॒ ऋ॒ लृ॒	आ॒ँ ई॒ँ ऊ॒ँ ॠ॒ँ ए॒ँ ओ॒ँ ऐ॒ँ औ॒ँ	आ॒ ई॒ ऊ॒ ॠ॒ ए॒ ओ॒ ऐ॒ औ॒	आ॒ँ३ ई॒ँ३ ऊ॒ँ३ ॠ॒ँ३लृ॒ँ३ए॒ँ३ ओ॒ँ३ ऐ॒ँ३ औ॒ँ३	आ॒३ ई॒३ ऊ॒३ ॠ॒३लृ॒३ए॒३ ओ॒३ ऐ॒३ औ॒३
3.स्वरितः		3.स्वरितः		3.स्वरितः	
1.अनुनासिक	2.अननुनासिक	1.अनुनासिक	2.अननुनासिक	1.अनुनासिक	2.अननुनासिक
अँ॑ इँ॑ उँ॑ ऋँ॑ लृँ॑	अ॑ इ॑ उ॑ ऋ॑ लृ॑	आँ॑ ईँ॑ ऊँ॑ ॠँ॑ एँ॑ ओँ॑ ऐँ॑ औँ॑	आ॑ ई॑ ऊ॑ ॠ॑ ए॑ ओ॑ ऐ॑ औ॑	आँ॑३ ईँ॑३ ऊँ॑३ ॠँ॑३लृँ॑३एँ॑३ ओँ॑३ ऐँ॑३ औँ॑३	आ॑३ ई॑३ ऊ॑३ ॠ॑३लृ॑३ए॑३ ओ॑३ ऐ॑३ औ॑३

सवर्णसंज्ञा

सूत्रम्- तुल्यास्यप्रयत्नं सवर्णम्

ताल्वादिस्थानम्= कण्ठादि- अष्टौ स्थानानि आभ्यन्तरप्रयत्नश्च = स्पृष्टादयः पञ्च प्रयत्नाः इत्येतद्द्वयं यस्य= वर्णस्य येन= वर्णेन तुल्यं= समानं तन्मिथः= तयोः परस्परं सवर्णसंज्ञं स्यात्।

(ऋलृवर्णयोर्मिथः= ऋकारलृकारयोः परस्परं सावर्ण्यं =सवर्णसंज्ञा वाच्यम्= वक्तव्या)।

अथ स्थानानि

अ-कु= कवर्ग ह-विसर्जनीयानां= विसर्गाणां कण्ठः।

ऋ-टु= टवर्ग र-षाणां मूर्धा।

उ-पु= पवर्ग उपध्मानीयानामोष्ठौ।

एदैतोः कण्ठतालु।

वकारस्य दन्तोष्ठम्।

नासिकानुस्वारस्य।

इ-चु= चवर्ग य-शानां तालु।

लृ-तु=तवर्ग ल-सानां दन्ताः।

ञ-म-ङ-ण-नानां नासिका च।

ओदौतोः कण्ठोष्ठम्।

जिह्वामूलीयस्य जिह्वामूलम्।

आभ्यन्तर-प्रयत्नाः

(वर्णोच्चारणे) यत्नो द्विधा - आभ्यन्तरो बाह्यश्च।

आद्यः= आभ्यन्तरः प्रयत्नः पञ्चधा = पञ्चप्रकारकाः - 1.स्पृष्ट2.ईषत्स्पृष्ट 3.ईषद्विवृत 4.विवृत 5.संवृत-भेदात्।

- तत्र स्पृष्टं प्रयतनं स्पर्शानाम्। → क ख ग घ ङ / च छ ज झ ञ / ट ठ ड ढ ण / त थ द ध न / प फ ब भ म
- ईषत्स्पृष्टमन्तःस्थानाम्। → य व र ल
- ईषद्विवृतमूष्मणाम्। → श ष स ह
- विवृतं स्वराणाम्। → अ इ उ ऋ ऌ ए ओ ऐ औ
- ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। → दण्डाढकम्

प्रक्रियादशायां तु विवृतमेव। → दण्ड+ आढकम्

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

बाह्य-यत्नाः

1.विवारः 2.संवारः 3.श्वासः 4.नादः 5.घोषः 6.अघोषोः
7.अल्पप्राणः 8.महाप्राणः 9.उदात्तः 10.अनुदात्तः 11.स्वरितिश्चेति।

खरो विवाराः श्वासा अघोषाश्च।

हशः संवारा नादा घोषाश्च।

अचः उदात्त-अनुदात्त-स्वरिताश्च

1.अ इ उ ण्	2.ऋ ऌ क्	3.ए ओ ङ्	4.ऐ औ च्
5.ह य व र ट्	6.लँ ण्	7.ञ म ङ ण न म्	8.झ भ ञ्
9.घ ढ ध ष्	10.ज ब ग ड द श्	11.ख फ छ ठ थ च ट त व्	
12.क प य्	13.श ष स र्	14.ह ल्	

वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः।

य व र ल

वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः।

श ष स ह

1	2	3	4	5
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

- कादयो मावसानाः स्पर्शाः।
- यणो ऽन्तःस्थाः।
- शल ऊष्माणः।
- अचः स्वराः।
- ≍क≍ख इति कखाभ्यां प्रगर्धविसर्गसदृशो जिह्वामूलीयः।
- ≍प≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः।
- अं अः इत्यचः परावनुस्वारविसर्गौ॥

अणुदित्सवर्णस्य चाप्रत्ययः

पदच्छेदः- अण् उदित् सवर्णस्य च अप्रत्यय

अस्य सूत्रस्य आरम्भः किमर्थः ?

उत्तरम्- माहेश्वरसूत्रेषु दीर्घ-प्लुतादीनाम् अभावात् आ ई ऊ इत्यादिषु स्थानेषु इष्टं कार्यं न स्यात्। इष्यते च अत्रापि कार्यम् अत एव सूत्रारम्भः।

प्रतीयत= विधीयत इति प्रत्ययः।
जिसका विधान किया जाए उसे प्रत्यय कहते हैं।

इक्(इ उ ऋ ऌ) के स्थान पर
यण् (य् व् र् ल्) होते हैं।

अविधीयमान

विधीयमान

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

अणुदित्सवर्णस्य चाप्रत्ययः

सूत्रार्थः-

♦ अविधीयमानः= विधेयभिन्नरूपः अण्= पर-णकार-पर्यन्तः-अण् प्रत्याहार-गतवर्णः, सवर्णस्य संज्ञा= बोधकः / ग्राहकः स्यात्।

♦ उदित् च= कु चु टु तु पु सवर्णस्य संज्ञा= बोधकः / ग्राहकः स्यात्।

♦ अत्रैवाण्= अस्मिन् एव सूत्रे अण् प्रत्याहारः परेण= लँण् इति णकारेण (गृह्यते)।

♦ कु चु टु तु पु एते उदितः= उत् इत् येषाम्।

♦ तदेवम् - अ इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः। एवं ऌकारोऽपि। एचो द्वादशानाम्। अनुनासिकाननुनासिकभेदेन यवला द्विधा= य् यँ् व् वँ् ल् लँ् , तेन (हेतुना प्रत्याहारसूत्रेषु पठिताः) अननुनासिकाः ते (यवलाः) द्वयोर्द्वयोस्संज्ञा= ग्राहकाः भवन्ति॥

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

परः संनिकर्षः संहिता

सूत्रार्थः-

◆ वर्णानाम् (उच्चारणे) अतिशयितः = अत्यन्तः सन्निधिः = सामीप्यं संहितासंज्ञः स्यात्।

◆ एकस्य वर्णस्य उच्चारणानन्तरं द्वितीयवर्णस्य उच्चारणे कृते सति उभयोर्मध्ये यः कालः तिष्ठति, स कालः अर्धमात्रा (0.35sec) भवति।

◆ वर्णानाम् अत्यन्तसन्निधिः तदा एव संभवति यदा उच्चार्यमाण-वर्णयोर्मध्ये अर्धमात्रा एव कालव्यवधानः (Gape) स्यात्।

◆ अर्धमात्राधिक-कालव्यवधाने तु वर्णानाम् अत्यन्त-सन्निधिः नैव संभवति। अतः संहिता संज्ञा अपि न भवति।


द् $\frac{1}{2}$ मात्रा ए $\frac{1}{2}$ मात्रा व् $\frac{1}{2}$ मात्रा आ $\frac{1}{2}$ मात्रा ल् $\frac{1}{2}$ मात्रा अ $\frac{1}{2}$ मात्रा य् $\frac{1}{2}$ मात्रा अ	(देवालयः) सर्वत्र संहिता अस्ति।
द् $\frac{1}{2}$ मात्रा ए 3मात्रा व् $\frac{1}{2}$ मात्रा आ 2मात्रा ल् $\frac{1}{2}$ मात्रा अ $\frac{1}{2}$ मात्रा य् $\frac{1}{2}$ मात्रा अ	सर्वत्र संहिता नास्ति।

हलोऽनन्तराः संयोगः

सूत्रार्थः-

♦ अज्भिः= स्वरवर्णैः अव्यवहिता= व्यवधानरहिताः हलः= व्यञ्जनवर्णाः संयोगसंज्ञाः स्युः

उदाहरणम्-



प्रत्युदाहरणम्- देवालयः

सुप्तिङन्तं पदम्

सूत्रार्थः-

♦ सुबन्तं= सुप्-प्रत्ययः अन्ते यस्य तदादि-शब्दसमुदायं तिङन्तं= तिङ्-प्रत्ययः अन्ते यस्य तदादि-शब्दसमुदायं च पदसंज्ञं स्यात् ।

सुप्-प्रत्ययाः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सु	औ	जस्
द्वितीया	अम्	औट्	शस्
तृतीया	टा	भ्याम्	भिस्
चतुर्थी	ङे	भ्याम्	भ्यस्
पञ्चमी	ङसि	भ्याम्	भ्यस्
षष्ठी	ङस्	ओस्	आम्
सप्तमी	ङि	ओस्	सुप्

बालकः	बालकौ	बालकाः
लता	लते	लताः
ज्ञानम्	ज्ञाने	ज्ञानानि

तिङ्-प्रत्ययाः

1. तिप् , तस् , झि।
2. सिप् , थस् , थ।
3. मिप् , वस् , मस्।

आत्मनेपदः–

1. त , आताम् , झ।
2. थास् , आथाम् , ध्वम्।
3. इट् , वहि , महिङ्।

पठति पठिष्यति पठतु अपठत् पठेत्
लिखति लिखिष्यति लिखतु अलिखत् लिखेत्
गच्छति गमिष्यति गच्छतु अगच्छत् गच्छेत्

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

निवेदनम्

यह पठन-पाठनसामग्री 'संस्कृतव्याकरण' में प्रवेशेच्छुक छात्राध्यापकों के हेतु 'संस्कृतसारः' इस समाजसेविका संस्था द्वारा संस्कृतभाषा की सेवार्थ प्रस्तुत की जा रही है।

अतः आपसे निवेदन है कि इन **'लघुसिद्धान्तकौमुदी'** स्लाइड्स् व **वीडियोज्** का अपने पठन-पाठन में पर्याप्त उपयोग कर संस्कृत की सेवा में हमारा सहयोग करें।

दिनाङ्कः-
15.08.2020

निवेदकः-
संस्कृतशिक्षा-परिवारः
(सम्पर्कसूत्रम्-9424692199)
sanskritshiksha2020@gmail.com

सञ्ज्ञाप्रकरणस्य प्रश्नाः

1.लघुसिद्धान्तकौमुद्याः रचयिता कः ?

क. पाणिनिः

ख. पतञ्जलिः

ग. वरदराजाचार्यः

घ. भट्टोजिदीक्षितः

2. माहेश्वरसूत्रेषु हकारस्य पाठोऽस्ति —

क. द्विवारम्

ख. एकवारम्

ग. त्रिवारम्

घ. पाठो नास्ति।

3. हल्-प्रत्याहारे कति वर्णाः सन्ति—

क. 33

ख. 34

ग. 43

घ. 42

4.निम्नलिखितेषु अयं वर्णः 'झय्' प्रत्याहारे आगच्छति—

क. र

ख. ह

ग. द

घ. म

5. यकारस्य आभ्यन्तर प्रयत्नः कः ?

क. स्पृष्टः

ख. ईषत्स्पृष्टः

ग. विवृतम्

घ. संवृतम्

6. 'शिरीष शर्मा' इत्यस्मिन् स्वर-व्यञ्जनानां क्रमिक-स्थितिं चिनुत—

क. श् इ र् ई ष् श् र् म् आ

ख. श् इ र् ई ष् अ श् अ म् आ र्

ग. इ श् र् ई ष् अ श् अ र् म् आ

घ. श् इ र् ई ष् अ श् अ र् म् आ

7. 'षट्पदः' इत्यस्मिन् संयोगसञ्ज्ञा कस्य भवति ?

क. षकार-टकारयोः

ख. टकार-पकारयोः

ग. अकार-टकारयोः

घ. सम्पूर्णस्य षट्पदस्य

उत्तराणि— 1-ग 2-क 3-ख 4-ग 5-ख 6-घ 7-ख

सञ्ज्ञाप्रकरणस्य facebook_videos_links

सञ्ज्ञाप्रकरणस्य यू-ट्यूब वीडियोज् लिंक्स्

कृपया अत्र स्पर्श करोतु

YouTube संस्कृतसारः छिद्यन्ते सर्वसंशयाः

- ❖ कक्षा-००१ व्याकरणाध्ययनस्य प्रयोजनानि। तत्र पाणिनिव्याकरणस्योपादेयता
- ❖ कक्षा००२ मङ्गलाचरणम्, ग्रन्थप्रस्तावना
- ❖ कक्षा-००३ माहेश्वरसूत्राणां व्याख्या, अध्ययनविधौ शास्त्रस्थिरीकरणस्य उपायाः
- ❖ कक्षा- ००४ हलन्त्यम्
- ❖ कक्षा-००५ अदर्शनं लोपः, तस्य लोपः, आदिरन्त्येन सहेता
- ❖ कक्षा- ००६ ऊकालोऽज्झ्रस्वदीर्घप्लुतः, सप्तस्वराणां ज्ञानेन उदात्तादिज्ञानम्
- ❖ कक्षा-००७ उच्चैरुदात्तः,नीचैरनुदात्तः,समाहारः स्वरितः उदात्तानुदात्तस्वरितसंज्ञानां शास्त्रीयविवेचनम्
- ❖ कक्षा-००८ उदात्तादिस्वराणां लेखनप्रकारः, मुखनासिकावचनोऽनुनासिकः, तुल्यास्यप्रयत्नं सवर्णम्
- ❖ कक्षा- ००९ तुल्यास्यप्रयत्नं सवर्णम्-2
- ❖ कक्षा- ०१० पठितस्य परीक्षणम्, तुल्यास्यप्रयत्नं सवर्णम्--3
- ❖ कक्षा-०११ तुल्यास्यप्रयत्नं सवर्णम्-4
- ❖ कक्षा-०१२ पठितस्य परीक्षणम्
- ❖ कक्षा-०१३ शंकासमाधानम्, वर्णोत्पत्तिरहस्यम्
- ❖ कक्षा-०१४ अणुदित्सवर्णस्य चाप्रत्यय इति सूत्रस्य प्रयोजनम्
- ❖ कक्षा-०१५ अणुदित्सवर्णस्य चाप्रत्ययः भागः-२
- ❖ कक्षा-०१६ परः सन्निकर्षः संहिता, हलोऽनन्तराः संयोगः
- ❖ कक्षा-०१७ सुप्तिङन्तं पदम्

सूचना— जिस कक्षा के ऊपर क्लिक् करेंगे वह वीडियो खुलेगा। इसके लिए इंटरनेट ज़ुड़ा होना आवश्यक है।

॥श्रीवरदराजाचार्यविरचिता॥

लघुसिद्धान्तकौमुदी

तस्या इदं

अच्सन्धिप्रकरणम्

परामर्शकौ

प्रो.ब्रजभूषणओझा

प्रो.नीलाभतिवारी

प्रस्तोता

डॉ. श्रीओमशर्मा

तस्य डिजिटल-संस्करणम्
प्रस्तूयते

सन्धेः परिभाषा

वर्णयोः अत्यन्त-सामीप्ये पदान्ते वा यद् वर्णे परिवर्त्तनं भवति तदेव सन्धिः कथ्यते।

सन्धेः भेदाः

- अच्-सन्धिः
- हल्-सन्धिः
- विसर्ग-सन्धिः

अच्-सन्धिः कदा भवति ?

LEFT अच् + RIGHT अच्

- अच् वर्णः पूर्वं भवति। अच् वर्णः परे (बाद में) भवति चेद् तदा अच् सन्धिः प्रवर्त्तते।

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

लघुसिद्धान्तकौमुदी
(अच्सन्धिः)

- ❖ स्थानी
- ❖ आदेशः
- ❖ निमित्तम्

⇒ यस्य स्थाने किमपि विधीयते स स्थानी।

⇒ यो विधीयते स आदेशः।

⇒ कार्यस्य सिद्धये यत्कारणं भवति तत् निमित्तम् उच्यते।

अच्-सन्धेः भेदाः

पूर्वस्य स्थाने एव आदेशः

1. यण्-सन्धिः
2. अयादि-सन्धिः

पूर्व-परयोः स्थाने एकादेशः

3. गुण-सन्धिः
4. वृद्धि-सन्धिः
5. पररूप-सन्धिः
6. सवर्णदीर्घ-सन्धिः
7. पूर्वरूप-सन्धिः
8. प्रकृतिभाव-सन्धिः

आगमन-विधिना यण् सन्धिः

स्थानी	आदेश	निमित्त
इ	य्	असमान अच्
उ	व्	
ऋ	र्	
ऌ	ल्	

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

सूत्राणां प्रकाराः

Tipe of sutras

लघुसिद्धान्तकौमुदी
(अच्सन्धिः)

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्-विधं सूत्रलक्षणम्॥

१.संज्ञा— नामकरणं संज्ञा। (हलन्त्यम्,तुल्यास्यप्रयत्नं सवर्णम्, यचि भम्)

२.परिभाषा— विधिसूत्रस्य पथप्रदर्शकं परिभाषा। (तस्मिन्निति निर्दिष्टे पूर्वस्य)

३.विधिः— साक्षात् लक्ष्यसंस्कारकः विधिः। (इको यणचि, अनचि च)

४.नियमः— बहुत्र प्राप्तौ सङ्कोचनं नियमः। (पतिः समास एव, रात्सस्य)

५.अतिदेशः— यो यादृशो नास्ति, तादृशं स्वीकरणमतिदेशः। (अन्तादिवच्च)

६.अधिकारः— एकत्र पठितस्य (पदस्य) अग्रेऽपि सूत्रेषु लाभः अधिकारः। (प्रत्ययः)

यण् सन्धिः

सूत्रम्— इको यणचि (सूत्रच्छेदः- इकः यण् अचि)

सूत्रार्थः— इकः स्थाने = इक् के स्थान पर यण् स्यादचि = यण् हो अच् समीप/ परे रहते संहितायां विषये= वर्णों की अतिशयित समीपता के विषय में।

सूत्रम्— तस्मिन्निति निर्दिष्टे पूर्वस्य (सूत्रच्छेदः- तस्मिन् इति निर्दिष्टे पूर्वस्य)

सूत्रार्थः— सप्तमीनिर्देशेन= यस्मिन् सूत्रे सप्तमीनिर्देशद्वारा विधीयमानं कार्य= कार्य विधीयते(तत् कार्य) वर्णान्तरेण अव्यवहितस्य =विजातीय-वर्ण-व्यवधान-शून्यस्य पूर्वस्य बोध्यम्= पूर्वस्य स्थाने स्यात्।

सुधी+ उपास्यः सुध् ई + उपास्यः

(स् उ ध् ई + उ प् आ स् य् अः)

अचः अव्यवहितपूर्वस्य इकः स्थाने अन्तरतमो यणादेशः स्यात् संहितायां विषये।


सूत्रम्— स्थानेऽन्तरतमः (सूत्रच्छेदः- स्थाने अन्तरतमः)

सूत्रार्थः— प्रसङ्गे सति= एकस्य स्थानिनः स्थाने बहूनाम् आदेशानां प्राप्ति प्रसङ्गे सदृशतमः= अन्तरतमः आदेशः= विधेयः स्यात्। सुध् य् + उपास्य इति जाते

सूत्रम्— अनचि च

सूत्रार्थः— अचः परस्य= अच् से परे यरो द्वे वा स्तो = यर् को विकल्प से दो (द्वित्व) हो जाते हैं। न त्वचि= अच् परे हो तो (द्वित्व) न हो।

सुध्युपास्यः ⇒ इति धकारस्य द्वित्वेन सुध् ध् य् +उपास्य इति जाते।



संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

सूत्रम्— झलां जश् झशि

लघुसिद्धान्तकौमुदी (अच्सन्धिः)

सूत्रार्थः— स्पष्टम्। (झलां स्थाने जश् स्यात् झशि परे।)

⇒ इति पूर्व-धकारस्य दकारः। सुद् ध् य् + उपास्य इति स्थिते

स्थानी
(झल्)
8.झ भ ञ् 9.घ ढ ध ष्
10.ज ब ग ड द श्
11.ख फ छ ठ थ च ट त व्
12.क प य् 13.श ष स र् 14.ह ल्

निमित्तम्
(झश्)
8.झ भ ञ् 9.घ ढ ध ष्
10.ज ब ग ड द श्

आदेशः
(जश्)
10.ज ब ग ड द श्

सु ध् ध् य् + उपास्यः
सु द् ध् य् + उपास्यः


सूत्रम्— **संयोगान्तस्य लोपः** (सूत्रच्छेदः- संयोग-अन्तस्य लोपः)

सूत्रार्थः— संयोगान्तं यत्पदं तस्य (तदन्तस्य) लोपः स्यात्॥

सूत्रम्— **अलोऽन्त्यस्य** (सूत्रच्छेदः- अलः अन्त्यस्य)

सूत्रार्थः— षष्ठीनिर्दिष्टाऽन्त्यस्याल आदेशः स्यात्।

इति यलोपे प्राप्ते - (यणः प्रतिषेधो वाच्यः)। संयोगान्तस्य यणः लोपो न स्यात्।



1. सुध्युपास्यः
2. सुद्ध्युपास्यः

मधु+ अरिः
मध् उ + अरिः
मध् व् + अरिः
1.मध्वरिः

म ध् ध् व् + अरिः
म द् ध् व् + अरिः
2.मद्ध्वरिः

धातृ + अंशः
धात् ऋ + अंशः
धात् र् + अंशः
1.धात्रंशः

धात् त् र् + अंशः
2.धात्त्रंशः

ऌ+ आकृतिः
ल्+ आकृतिः
लाकृतिः

अयादि/ यान्त-वान्तादेश-सन्धिः

सूत्रम्— एचोऽयवायावः (सूत्रच्छेदः- एचः अय् -अव् -आय् -आवः)

सूत्रार्थः— एचः (क्रमाद्) अय् अव् आय् आव् एते स्युरचि ।

सूत्रम्— यथासंख्यमनुदेशः समानाम् (सूत्रच्छेदः- यथासंख्यम् अनुदेशः समानाम्)

सूत्रार्थः— समसंबन्धी = समानसंख्याक-संबन्धिनः विधिः = कार्य यथासंख्यम् = क्रमशः स्यात् ।

स्थानी

(एचः)

ए ओ ऐ औ

आदेशः

अय् अव् आय् आव्

निमित्तम्

अच्

सूत्रम्— वान्तो यि प्रत्यये

सूत्रार्थः— यकारादौ प्रत्यये परे ओदौतोरव् -आव् एतौ स्तः। गव्यम्। नाव्यम्।

वार्तिकम्— (अध्वपरिमाणे च) अर्थः- मार्गपरिमाणे गम्ये गो -शब्दस्य ओकारस्य यूतिशब्दे परे अवादेशः लोकेऽपि भवति। गव्यूतिः॥

स्थानी
ओ औ

आदेशः
अव् आव्

निमित्तम्
यकारादि-प्रत्ययः

गो + यम्
ग् ओ + यम्
ग् अव् + यम्
गव्यम्

नौ + यम्
न् औ + यम्
न् आव् + यम्
नाव्यम्

गो+ यूतिः
ग् अव्+ यूतिः
गव्यूतिः

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

अयादि-सन्धेः- अभ्यासः

लघुसिद्धान्तकौमुदी
(अच्सन्धिः)

निम्नलिखित रूपों में सन्धिच्छेद कर के सूत्रों द्वारा उसे सिद्ध करें —

१. वटवृक्षः । २. ग्लायति । ३. भवति । ४. गणयति । ५. माण्डव्य । ६. स्तावकः । ७. नयति । ८. गायन्ति । ९. नाविकः । १०. शयनम् । ११. जयः । १२. असावुत्तुङ्गः। १३. औपगवः । १४. चयः । १५. चिक्षाय । १६. अलावीत् । १७. पवनः । १८. नयः। १९. त्रायते । २०. कवये। २१. क्षयः । २२. मनवे । २३ राय । २४. पपावसाविह। २५. द्रवति।

निम्नलिखित रूपों में सन्धि कर के सूत्रों द्वारा उसे सिद्ध करें —

१. असौ+अयम् । २. असे+ए। ३. चे+अन । ४. लो+अन । ५. चोरे+अति । ६. भौ+उक । ७. गै+अक। ८. साधो+ए। ९. शङ्को+य । १०. अग्नौ +इह । ११. भौ+ अयति । १२. पो+ इत्र। १३. शे+आन । १४. भो+अन। १५. ग्लौ+औ । १६. बाभ्रो +य । १७. गो+इति । १८. बालौ + अत्र । १९ इन्दौ + उदिते । २०. पूजार्हौ+अरिसूदन ।


गुण-सन्धिः

सूत्रम्— अदेङ् गुणः

सूत्रार्थः— अत् एङ् च गुणसंज्ञः स्यात्॥

सूत्रम्— तपरस्तत्कालस्य

सूत्रार्थः— 1. तः परो यस्मात् स= तादृशो वर्णः च 2.तात्परश्च= तकारात् परो यः शब्दः तद्बोध्यो वर्णश्च उच्चार्यमाणसमकालस्यैव= (तपरत्वेन) उच्चार्यमाणो यो वर्णः, तस्य यः कालः, तत्कालेन सदृशः कालो यस्य तस्य वर्णस्यैव संज्ञा स्यात्॥



गुणसंज्ञा- अ ए ओ

सूत्रम्—आद्गुणः

सूत्रार्थः— अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्।

उप+ इन्द्रः

उप् अ + इ न्द्रः

उप् (ए) न्द्रः

उपेन्द्रः

गङ्गा+ उदकम्

गङ्ग् आ+ उ दकम्

गङ्ग् (ओ) दकम्

गङ्गोदकम्

गुण-सन्धौ रपर-नियमः

सूत्रम्— उपदेशेऽजनुनासिक इत् (सूत्रच्छेदः- उपदेशे अच् अनुनासिकः इत्)

सूत्रार्थः— उपदेशे= माहेश्वरसूत्र-धातु-प्रातिपदिक-प्रत्यय-निपात-आगम-आदेशेषु अनुनासिको अच्= अनुनासिकत्व-धर्मविशिष्टः स्वरः इत्संज्ञः स्यात्।

प्रतिज्ञानुनासिक्याः= प्रतिज्ञा- (उच्चारण-व्यवहारः) विषयानुनासिक्यवन्तः

पाणिनीयाः= पाणिनिप्रभृतिप्रोक्ताः वर्णाः।

लण्सूत्रस्थ-अवर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा॥

ह य व र ट्   लँ ण्

सूत्रम्— उरण् रपरः

सूत्रार्थः— ऋ इति त्रिंशतः संज्ञेत्युक्तम्। तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते।

कृष्ण+ ऋद्धि	तव+ ऌकारः
कृष्ण् अ+ ऋ द्धि	तव् अ+ ऌकारः
कृष्ण् अर्+ द्धि	तव् अल् कारः
कृष्णर्द्धिः	तवल्कारः॥

⇒ शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियावान् पुरुषः स विद्वान् ।
सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम् ॥

⇒ जानामि धर्मं न च मे प्रवृत्तिः । जानाम्यधर्मं न च मे निवृत्तिः ॥

⇒ परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम्। धर्मे स्वीयमनुष्ठानं कस्यचित् सुमहात्मनः॥

⇒ इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।

⇒ उष्ट्राणां च विवाहेषु गीतं गायन्ति गर्दभाः। परस्परं प्रशंसन्ति अहो रूपमहो ध्वनिः ॥

⇒ नात्युच्चशिखरो मेरुर्नातिनीचं रसातलम्। व्यवसायद्वितीयानां नात्यपारो महोदधिः ॥

⇒ सुखं शेते सत्यवक्ता सुखं शेते मितव्ययी ।हितभुक् मितभुक् चैव तथैव विजितेन्द्रियः ॥

⇒ अधीत्य चतुरो वेदान् सर्वशास्त्राण्यनेकशः । ब्रह्मतत्त्वं न जानाति दर्वी सूपरसं यथा ॥

⇒ या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता ।

⇒ कस्यचित् किमपि नो हरणीयं ,मर्मवाक्यमपि नोच्चरणीयम्। श्रीपतेः पदयुगं स्मरणीयं,
लीलया भवजलं तरणीयम्॥

संस्कृतसारः छिद्यन्ते सर्वसंशयाः

अयादिसन्ध्यनन्तरं गुणसन्धेः प्राप्तिवारणम्

लघुसिद्धान्तकौमुदी (अच्सन्धिः)

सूत्रम्—लोपः शाकल्यस्य ॥८,३.१९॥

सूत्रार्थः— अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वाशि परे ।

अ / आ

पदान्तः य् / व्

अश्

लोपः

हरे + इह
हर् अय् + इह
हर् अ + इह
1.हर इह
2.हरयिह

आद्गुणः ॥ ६,१.८७॥

विष्णो+ इह
विष्ण् अव् + इह
विष्ण् अ+ इह
1.विष्ण इह
2.विष्णविह

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

अष्टाध्यायी मध्ये सूत्राणाम् असिद्धत्व-व्यवस्था

लघुसिद्धान्तकौमुदी
(अच्सन्धिः)

सूत्रम्— पूर्वत्रासिद्धम् ॥ ८,२.१ ॥

सूत्रार्थः— सपादसप्ताध्यायीं प्रति =सवा सात अध्यायों में स्थित सूत्रों के प्रति त्रिपाद्यसिद्धा= त्रिपादी सूत्र असिद्ध होते हैं।

त्रिपाद्यामपि= त्रिपादियों में भी पूर्वं प्रति परं शास्त्रमसिद्धम्= पूर्व सूत्रों के प्रति बाद बाद वाले सूत्र असिद्ध होते हैं।

प्रथमोऽध्याय	द्वितीयोऽध्याय	तृतीयोऽध्याय	चतुर्थोऽध्याय	पञ्चमोऽध्याय	षष्ठोऽध्याय	सप्तमोऽध्याय	अष्टमोऽध्याय
1.पादः	1.पादः	1.पादः	1.पादः	1.पादः	1.पादः	1.पादः	1.पादः
2.पादः	2.पादः	2.पादः	2.पादः	2.पादः	2.पादः	2.पादः	2.पादः
3.पादः	3.पादः	3.पादः	3.पादः	3.पादः	3.पादः	3.पादः	3.पादः
4.पादः	4.पादः	4.पादः	4.पादः	4.पादः	4.पादः	4.पादः	4.पादः

वृद्धि-सन्धिः

संज्ञासूत्रम्—वृद्धिरादैच् (सूत्रच्छेदः- वृद्धिः आत् ऐच्)

सूत्रार्थः— आदैच्च वृद्धिसंज्ञः स्यात्॥

विधिसूत्रम्— वृद्धिरेचि (सूत्रच्छेदः- वृद्धिः एचि)

सूत्रार्थः— आदेचि परे= अवर्णात् एच्-परे वृद्धिरेकादेशः स्यात्। गुणापवादः।

⇒ यस्य सूत्रस्य अवश्य-प्राप्तौ यद् अपरं सूत्रमारभ्यते स तस्य अपवादो भवति।

कृष्ण+ एकत्वम्	गङ्गा+ ओघः	देव+ ऐश्वर्यम्	कृष्ण+ औत्कण्ठ्यम्
कृष्ण् अ+ ए कत्वम्	गङ्ग् आ + ओ घः	देव् अ+ ऐ श्वर्यम्	कृष्ण् अ+ औ त्कण्ठ्यम्
कृष्ण् ऐ कत्वम्	गङ्ग् औ घः	देव् ऐ श्वर्यम्	कृष्ण् औ त्कण्ठ्यम्
कृष्णैकत्वम्	गङ्गौघः	देवैश्वर्यम्	कृष्णौत्कण्ठ्यम्

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

सवर्णदीर्घ-सन्धिः

लघुसिद्धान्तकौमुदी
(अच्सन्धिः)

सूत्रम्—अकः सवर्णे दीर्घः

सूत्रार्थः— अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात्।

(अक्)
अ[1] इ[2] उ[3] ऋ[4] ऌ[5]

आदेशः
1.आ
2.ई
3.ऊ
4.ॠ
5.ॠ

(सवर्ण-अच्)
अ[1] इ[2] उ[3] ऋ[4] ऌ[5]

दैत्य+ अरिः	श्री + ईशः
दैत्य् अ+ अ रिः	श्र् ई + ई शः
दैत्य् आ रिः	श्र् ई शः
दैत्यारिः	श्रीशः

विष्णु+ उदयः	होतृ +ऋकारः
विष्ण् उ + उ दयः	होत् ऋ +ऋकारः
विष्ण् ऊ दयः	होत् ॠ कारः
विष्णूदयः	होतॄकारः

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

वृद्धि-सन्धिः

लघुसिद्धान्तकौमुदी (अच्सन्धिः)

सूत्रम्—एत्येधत्यूठ्सु (सूत्रच्छेदः- एति एधति ऊठ्सु)

सूत्रार्थः— अवर्णाद् एजाद्योः एति+ एधत्योः ऊठि च परे वृद्धिरेकादेशः स्यात्।

सरलार्थः— अवर्णाद् एजादौ इण्-धातौ परे,अवर्णाद् एजादौ एध्-धातौ परे, अवर्णाद् ऊठि च परे पूर्वपरयोः वृद्धिरेकादेशः स्यात्।

उप + एति
उप् अ + ए ति
उप् ऐ ति
उपैति

उप + एधते
उप् अ + ए धते
उप् ऐ धते
उपैधते

प्रष्ठ+ ऊहः
प्रष्ठ् अ+ ऊ हः
प्रष्ठ् औ हः
प्रष्ठौहः

उप+ इतः
उप् अ+ इ तः
उप् ए तः
उपेतः

मा भवान् प्र+ इदिधत्
मा भवान् प्र् अ+ इ दिधत्
मा भवान् प्र् ए दिधत्
मा भवान् प्रेदिधत्

प्रश्नः-एजाद्योः किम् ? (इण्-एध्-धात्वोः एजादि इति विशेषणं किमर्थम्?)

उत्तरम्-एजादौ इति विशेषणाभावे यत्र एतौ धातू एजादि न स्तः, तत्रापि वृद्धिः प्राप्नोति। सा वृद्धिः तत्र न स्यात्, एतदर्थम् एजादिग्रहणं सार्थकम्।

वार्तिकम्— (अक्षादूहिन्यामुपसङ्ख्यानम्) (वार्तिकच्छेदः- अक्षाद् ऊहिन्याम् उपसंख्यानम्)

वार्त्तिकार्थः— 'अक्ष'शब्दात् 'ऊहिनी'शब्दे परे (सूत्रे) उपसंख्यानम्= अधिकवचनं कर्तव्यम्। (वृद्धिः भवति इति भावः)।

अक्ष+ ऊहिनी

अक्ष् अ+ ऊ हिनी

अक्ष् औ हिनी

अक्षौहिणी

(अक्षौहिण्याः प्रमाणम्)

अक्षौहिण्यः सप्ततिरष्टशतान्येकविंशतिसहस्रकम्।

द्विरदस्तथा रथास्तत् त्रिपञ्चगुणकास्तुरङ्गनराः॥

. रथाः—21870

. गजाः—21870

. अश्वाः—65610

. नराः (पदातयः)—109350

वार्तिकम्— (प्रादूहोढोढ्येषैष्येषु) (वार्तिकच्छेदः) - प्राद् ऊह-ऊढ-ऊढि-एष-एष्येषु)

वार्त्तिकार्थः— 'प्र'शब्दात् ऊहः ऊढः ऊढिः एषः एष्यः इत्येतेषु शब्देषु परेषु पूर्वपरयोः स्थाने वृद्धिरेकादेशः स्यात्।

प्र+ ऊहः	प्र+ ऊढः	प्र+ ऊढिः	प्र+ एषः	प्र+ एष्यः
प्र् अ+ ऊ हः	प्र् अ+ ऊ ढः	प्र् अ+ ऊ ढिः	प्र् अ+ ए षः	प्र् अ+ ए ष्यः
प्र् औ हः	प्र् औ ढः	प्र् औ ढिः	प्र् ऐ षः	प्र् ऐ ष्यः
प्रौहः	प्रौढः	प्रौढिः	प्रैषः	प्रैष्यः

वार्तिकम्— (ऋते च तृतीयासमासे)

वार्त्तिकार्थः— 'अ'वर्णात् 'ऋत'शब्दे परे वृद्धिरेकादेशः स्यात् तृतीयासमासे।

सुखेन ऋतः सुखार्तः। तृतीयेति किम् ? परमर्तः।

सुख+ऋतः

सुख् अ+ऋ तः

सुख् आर् तः

सुखार्तः

परम+ऋतः

परम् अ+ऋ तः

परम् अर् तः

परमर्तः

वार्तिकम्— (प्रवत्सतरकम्बलवसनार्णदशानामृणे)

(वार्तिकच्छेदः) - प्र-वत्सतर कम्बल-वसन-ऋण-दशानाम् ऋणे)

वार्त्तिकार्थः— प्र-वत्सतर कम्बल-वसन-ऋण-दश-एतेभ्यः अकारान्तेभ्यः ‘ऋण’शब्दे परे वृद्धिरेकादेशः स्यात्।

प्र+ ऋणम्	वत्सतर+ ऋणम्	कम्बल+ ऋणम्	वसन+ ऋणम्	ऋण+ ऋणम्	दश+ ऋणम्
प् आर् णम्	वत्सतर् आर् णम्	कम्बल् आर् णम्	वसन् आर् णम्	ऋण् आर् णम्	दश्आर् णम्
प्रार्णम्	वत्सतरार्णम्	कम्बलार्णम्	वसनार्णम्	ऋणार्णम्	दशार्णम्

सूत्रम्— उपसर्गाः क्रियायोगे

सूत्रार्थः— प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः।

⇒ प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप - एते प्रादयः॥

आ + गच्छति   प्र + वर्त्तते   अनु + भवति   परा + जयते

सूत्रम्— भूवादयो धातवः

सूत्रार्थः— क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः॥

भू + ति   पठ् + ति   कृ + ति

सूत्रम्— उपसर्गादृति धातौ॥

सूत्रार्थः— अवर्णान्ताद् उपसर्गाद् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यात्।

प्र +ऋच्छति

प्र् अ + ऋ च्छति

प्र् आर् च्छति

प्रार्च्छति॥

उप +ऋच्छति

पररूप-सन्धिः

सूत्रम्— एङि पररूपम्॥

सूत्रार्थः— आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात्।

अवर्णान्त-उपसर्गः → एङादि-धातुः

प्र+ एजते
प्र् अ+ ए जते
प्र् ए जते
प्रेजते

उप+ ओषति
उप् अ+ ओ षति
उप् ओ षति
उपोषति

टि-संज्ञानिमित्तक-पररूप-सन्धिः

सूत्रम्— अचोऽन्त्यादि टि॥

सूत्रार्थः— अचां मध्ये योऽन्त्यः स आदिर्यस्य तत् टिसंज्ञं स्यात्।

सरलार्थः— वर्णसमुदाय- मध्ये यावन्तः अच्वर्णा भवन्ति, तेषाम् अचां मध्ये यः अन्तिमः अच्, स अन्तिमाच् यस्य समुदायस्य आदिः, स समुदायः (अच्-हल्-समुदायः, अच्-रूपो वा समुदायः) टि-संज्ञको भवति।

वार्तिकम्— (शकन्ध्वादिषु पररूपं वाच्यम्)। तच्च टेः।

वार्त्तिकार्थः— शकन्ध्वादि-गणपठितेषु शब्देषु टेः पररूपं वक्तव्यम्।

शक + अन्धुः
शक् अ + अ न्धुः
शक् अ न्धुः
शकन्धुः

कर्क + अन्धुः
कर्क् अ + अ न्धुः
कर्क् अ न्धुः
कर्कन्धुः

मनस्+ ईषा
मन् अस्+ ई षा
मन् ई षा
मनीषा

आकृतिगणोऽयम्। मार्त्तण्डः।

अयम् = शकन्ध्वादिशब्दसमूहः आकृतिगणः = आकृत्या= स्वरूपेण= कार्यदर्शनेन गण्यते = परिचीयत इति आकृतिगणः।

अस्य भावः— एते एव शब्दा अत्र गणे निर्दिष्टा इत्येवं नियमो नास्ति। किन्तु यत्र शब्दे पररूपं दृश्यते तद्विधायकं च शास्त्रं नास्ति स शकन्ध्वादिगणे बोध्यः।

मृत+ अण्ड

मृत् अ+ अ ण्ड

मृत् अ ण्ड

मृतण्डः

मृतण्डाद् आगतः

मृतण्डे भवः

मृतण्डस्य अपत्यम्

मार्त्तण्डः

सूत्रम्-तद्धितेष्वचामादेः (वृद्धिः)

पररूप-सन्धिः

सूत्रम्— ओमाङोश्च

सूत्रार्थः— ओमि आङि चात्= अवर्णाद् परे पररूपमेकादेशः स्यात्।

'अ'वर्णात् → ओम्, आङ्

शिवाय+ ओं नमः
शिवाय् अ+ ओं नमः
शिवाय् ओं नमः
शिवायों नमः
शिवायोन्नमः

विद्या+ आलयः
विद्य् आ+ आ लयः
विद्य् आ लयः
विद्यालयः

संस्कृतसारः छिद्यन्ते सर्वसंशयाः

पररूप-सन्धिः

लघुसिद्धान्तकौमुदी (अच्सन्धिः)

शिव + एहि

शिव् अ + ए हि

शिव् + ए हि

शिवेहि

आ (ङ्) + इहि

आ + इ हि

एहि

सूत्रम्— अन्तादिवच्च

भावार्थः— योऽयमेकादेशः स पूर्वस्यान्तवत्परस्यादिवत्।

सूत्रार्थः— एकादेशस्य यः पूर्वस्थानी परस्थानी वा, तद्घटितो यः समुदायः तद्वृत्तिः यो धर्मः (धातुत्व-प्रातिपदिकत्व-सुबन्तत्व-प्रत्ययत्व-उपसर्गत्व-निपातत्वादिषु कश्चिदेकः समुदायवृत्तिधर्मः) स धर्म एकादेशविशिष्टेऽप्यतिदिश्यते।

अच्सन्धेः-अभ्यासः

- जन्माद्यस्य यतोऽन्वयादितरतः चार्थेष्वभिज्ञः स्वराट् ।
- सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिः तत् क्षणात् ॥
- अपि देवर्षिणाऽऽदिष्टः स कालोऽयमुपस्थितः ।
  यदाऽऽत्मनोऽङ्गमाक्रीडं भगवान् उत्सिसृक्षति ॥
- मन्य एतैर्महोत्पातैः नूनं भगवतः पदैः ।
- निमित्तान्यत्यरिष्टानि काले तु अनुगते नृणाम् ।
  लोभादि अधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥
- उत्तमौजाश्च वीर्यवान्। सर्वाणीन्द्रियकर्माणि।
- मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ।
- एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ।
- शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ।

प्रकृतिभाव-सन्धिः

सूत्रम्—सर्वत्र विभाषा: गोः

सूत्रार्थः— लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः पदान्ते। गो अग्रम्,एङन्तस्य किम् ? चित्रग्वग्रम्। पदान्ते किम् ? गोः॥

प्रश्नः— प्रकृतिभावः कः ?

उत्तरम्— स्वभावेन-अवस्थानं प्रकृतिभावः। यणादिसन्धिविकारशून्यमिति भावः।

गो + अग्रम्
ग् ओ + अ ग्रम्
गो अग्रम्

चित्रगु+ अग्रम्
चित्रग् व् + अग्रम्
चित्रग्वग्रम्

गो + अस्
गोः

1.एचोऽयवायावः
2.एङः पदान्तादति
3.अवङ् स्फोटायनस्य
4.सर्वत्र विभाषा गोः

सूत्रम्—अवङ् स्फोटायनस्य

सूत्रार्थः— पदान्ते एङन्तस्य गोः अवङ् वाचि। गवाग्रम्, गोऽग्रम्।
पदान्ते किम् ? गवि॥

गो + अग्रम्
ग् ओ + अ ग्रम्
गो अग्रम्
ग् अव + अ ग्रम्
गवाग्रम्
गो ऽग्रम्

सूत्रम्—अनेकाल् शित्सर्वस्य

सूत्रार्थः— य आदेशोऽनेकाल् शित् च,
स सर्वस्य स्थाने भवति।

गो + इ
ग् अव् + इ
गवि

अनेकाल्-उदाहरणम्— अतो भिस् ऐस्

शिद्- उदाहरणम्— इदम इश्

सूत्रम्—ङिच्च

सूत्रार्थः— ङिद् अनेकालपि अन्त्यस्यैव स्यात्॥

सूत्रम्—इन्द्रे च

सूत्रार्थः— गोरवङ् स्यादिन्द्रे। गवेन्द्रः॥

गो + इन्द्रः

ग् अवङ् + इन्द्रः

ग् अव + इन्द्रः

ग् अव् अ + इ न्द्रः

ग् अव् ए न्द्रः

गवेन्द्रः


प्लुतसंज्ञा-निमित्तक-प्रकृतिभाव-सन्धिः

सूत्रम्—दूराद्धूते च (सूत्रच्छेदः- दूरात् हूते च)

सूत्रार्थः— दूरात्सम्बोधने वाक्यस्य टेः प्लुतो वा॥

सूत्रम्—प्लुतप्रगृह्या अचि नित्यम्॥

सूत्रार्थः— एते = प्लुत-प्रगृह्यसंज्ञकाः अचि प्रकृत्या स्युः।



आगच्छ कृष्ण ३ + अत्र गौश्चरति।

1.आगच्छ कृष्ण३ अत्र गौश्चरति।

2.आगच्छ कृष्णात्र गौश्चरति।

प्रगृह्यसंज्ञा-निमित्तक-प्रकृतिभाव-सन्धिः

सूत्रम्—ईदूदेद् द्विवचनं प्रगृह्यम्॥

सूत्रार्थः— ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात्।

हरी एतौ। विष्णू इमौ। गङ्गे अमू॥

सूत्रम्—अदसो मात्॥

सूत्रार्थः— अस्मात्परावीदूतौ प्रगृह्यौ स्तः।

अमी ईशाः। रामकृष्णावमू आसाते।

हरी + एतौ	विष्णू + इमौ	गङ्गे+ अमू
हरी एतौ	विष्णू इमौ	गङ्गे अमू

अमी +ईशाः	रामकृष्णावमू +आसाते
अमी ईशाः	रामकृष्णावमू आसाते

मात्किम् ? अमुकेऽत्र॥

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	हरिः	हरी	हरयः
द्वितीया	हरिम्	हरी	हरीन्
तृतीया	हरिणा	हरिभ्याम्	हरिभिः
चतुर्थी	हरये	हरिभ्याम्	हरिभ्यः
पञ्चमी	हरेः	हरिभ्याम्	हरिभ्यः
षष्ठी	हरेः	हर्योः	हरीणाम्
सप्तमी	हरौ	हर्योः	हरिषु
सम्बोधन	हे हरे	हे हरी	हे हरयः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	विष्णुः	विष्णू	विष्णवः
द्वितीया	विष्णुम्	विष्णू	विष्णून्
तृतीया	विष्णुना	विष्णुभ्याम्	विष्णुभिः
चतुर्थी	विष्णवे	विष्णुभ्याम्	विष्णुभ्यः
पञ्चमी	विष्णोः	विष्णुभ्याम्	विष्णुभ्यः
षष्ठी	विष्णोः	विष्ण्वोः	विष्णूनाम्
सप्तमी	विष्णौ	विष्ण्वोः	विष्णुषु
सम्बोधन	हे विष्णो	हे विष्णू	हे विष्णवः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गङ्गा	गङ्गे	गङ्गाः
द्वितीया	गङ्गाम्	गङ्गे	गङ्गाः
तृतीया	गङ्गया	गङ्गाभ्याम्	गङ्गाभिः
चतुर्थी	गङ्गायै	गङ्गाभ्याम्	गङ्गाभ्यः
पञ्चमी	गङ्गायाः	गङ्गाभ्याम्	गङ्गाभ्यः
षष्ठी	गङ्गायाः	गङ्गयोः	गङ्गानाम्
सप्तमी	गङ्गायाम्	गङ्गयोः	गङ्गासु
सम्बोधन	हे गङ्गे	हे गङ्गे	हे गङ्गाः

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

निपातसंज्ञा

लघुसिद्धान्तकौमुदी
(अच्सन्धिः)

सूत्रम्—चादयोऽसत्त्वे (सूत्रच्छेदः- च आदयः असत्त्वे)

सूत्रार्थः— अद्रव्यार्थाश्चादयो निपाताः स्युः॥ (सत्त्वम्= द्रव्यम् , असत्त्वम्= अद्रव्यम्)

यत्र लिङ्गस्य संख्यायाः कारकस्य च प्रतीतिर्भवेत् तद् द्रव्यम्।

चादिगणे पठितः शब्दः	अर्थ-1	अर्थ-2
पशुः	सम्यक्	
ई	सम्बोधनम्	
शुकम्	शीघ्रता	

सूत्रम्— प्रादयः

सूत्रार्थः— एतेऽपि तथा॥ (अद्रव्यार्थाः प्रादयो निपातसंज्ञाः स्युः)

सूत्रम्— निपात एकाजनाङ् (सूत्रच्छेदः- निपात एकाच् अनाङ्)

सूत्रार्थः— एकोऽज् निपात आङ्वर्जः प्रगृह्यः स्यात्। इ इन्द्रः। उ उमेशः।

ङित्	अङित्
आ(ङ्) (प्रादि-मध्ये पाठः)	आ (चादिगणे पाठः)
ईषदर्थे[1] क्रियायोगे[2] मर्यादा[3]भिविधौ[4] च यः। एतमातं ङितं विद्यात्	वाक्य[5]स्मरणयो[6]रङित्॥

1.ओष्णम्॥ 2.आ+ इहि= एहि 3. 4.आ +अलवरात्= आलवराद् वृष्टो मेघः

5.आ एवं नु मन्यसे। 6. आ एवं किल तत्। अन्यत्र ङित्— आ ईषदुष्णम्

सूत्रम्— ओत्

सूत्रार्थः— ओदन्तो निपातः प्रगृह्यः स्यात्।

अहो ईशाः॥

सूत्रम्— सम्बुद्धौ शाकल्यस्येतावनार्षे॥

(सूत्रच्छेदः- सम्बुद्धौ शाकल्यस्य इतौ अनार्षे)

सूत्रार्थः— सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे।

विष्णो इति, विष्ण इति, विष्णविति॥

विष्णो + इति

1.विष्णो इति

लोपः शाकल्यस्य 3.विष्ण् अव् + इति

2.विष्ण् अ + इति

प्रकृतिभाव-सन्धिः

सूत्रम्— मय उञो वो वा॥

सूत्रार्थः— मयः (मय् इति प्रत्याहारात्) परस्य उञो= उकारस्य(निपातस्य) वो= वकारः स्याद् वाचि।

मय्

उञ्

उ

अच्

व्

अस्य सूत्रस्य आरम्भः किमर्थः?

उत्तरम्— निपात एकाजनाङ् इति सूत्रेण उकारस्य प्रगृह्यसंज्ञात्वात् नित्यप्रकृतिवद्भावे प्राप्ते, यणादेशे तु अप्राप्ते, अतः विकल्पेन वकारमात्रं विधानार्थः सूत्रारम्भः।

किम् उ + उक्तम्

किम् व् + उक्तम्

1.किम्वुक्तम्

2.किमु उक्तम्

प्रकृतिभाव-सन्धिः

सूत्रम्— इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च॥

सूत्रार्थः— पदान्ता इको ह्रस्वो वा स्युरसवर्णेऽचि।

चक्री + अत्र
चक्रि + अत्र
1.चक्रि अत्र

पदान्त-इक्

ह्रस्वः

असवर्ण-
अच्

चक्री + अत्र
चक्र् य् + अत्र
2.चक्र्यत्र

ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः।

पदान्ता इति किम् ? गौर्यौ -

गौरी + औ
गौर् य् + औ
गौर्यौ

प्रकृतिभाव-सन्धिः

सूत्रम् — अचो रहाभ्यां द्वे॥

सूत्रार्थः — अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। गौर्य्यौ।

अच् → र् / ह् → यर् → द्वित्व

गौरी + औ
गौर् य् + औ
गौर् य् य् + औ
1.गौर्य्यौ
2.गौर्यौ

वार्त्तिकम्— (न समासे)

अर्थः— समासे पदान्ता इको ह्रस्वो न स्याद् असवर्णेऽचि।

समासः- वाप्याम् अश्वः (सप्तमीतत्पुरुषः) = वाप्यश्वः॥

वापी + अश्वः
वाप् य् + अश्वः
वाप्यश्वः

अन्योदाहरणानि—
1.सुद्ध्युपास्यः 2.मद्ध्वरिः
3.गौर्यात्मजः

अन्योदाहरणानि—
1.शर्मा,शर्म्मा 2.कर्ता, कर्त्ता
3.आह्लादः, आह्ह्लादः

प्रकृतिभाव-सन्धिः

सूत्रम् — ऋत्यकः (सूत्रच्छेदः- ऋति अकः)

सूत्रार्थः — ऋति परे पदान्ता अकः प्राग्वद्वा। ब्रह्म ऋषिः, ब्रह्मर्षिः।

पदान्त-अक्

ह्रस्वः

ऋ

ब्रह्मा + ऋषिः

1.ब्रह्म ऋषिः

आ + ऋच्छत्

आर् च्छत्

आर्छत्

ब्रह्मा + ऋषिः

ब्रह्म् अर् षिः

2.ब्रह्मर्षिः

पदान्ताः किम् ? आर्छत्॥

इत्यच्सन्धिः

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

निवेदनम्

लघुसिद्धान्तकौमुदी
(अच्सन्धिः)

यह पठन-पाठनसामग्री 'संस्कृतव्याकरण' में प्रवेशेच्छुक छात्राध्यापकों के हेतु 'संस्कृतसारः' इस समाजसेविका संस्था द्वारा संस्कृतभाषा की सेवार्थ प्रस्तुत की जा रही है।

अतः आपसे निवेदन है कि इन 'लघुसिद्धान्तकौमुदी' स्लाइड्स् व वीडियोज् का अपने पठन-पाठन में पर्याप्त उपयोग कर संस्कृत की सेवा में हमारा सहयोग करें।

दिनाङ्कः-
15.09.2020

निवेदकः-

संस्कृतशिक्षा-परिवारः
(सम्पर्कसूत्रम्-9424692199)
sanskritshiksha2020@gmail.com

अच्सन्धेः परीक्षणम्

१. देव्युवाच इत्यत्र कः सन्धिः?

क. पूर्वरूपम्

ख. पररूपम्

ग. यण्सन्धिः

घ. अयादिसन्धिः

२.'पितृ + अंशः' इत्यनयोः पदयोः सन्धिपदं भवति

क. पित्रंशः

ख. पित्रांशः

ग. पितरंशः

घ. पितृंशः

३.'अनुभूत्यैकमानाय' सन्धिविच्छेदः अस्ति।

क. अनुभूति + ऐकमानाय

ख. अनुमत + एकमानाय

ग. अनुभूतिक +मानाय

घ. अनुभूति +मानाय

४.'अध्वपरिमाणे च' इति वार्तिकस्य उदाहरणम् अस्ति।

क. नायकः

ख. पावकः

ग. सृष्टिः

घ. गव्यूतिः

५.अ ए ओ इति वर्णानाम् का संज्ञा?

क. अयादिः

ख. यण्

ग. गुणः

घ. वृद्धिः

६.' अचो रहाभ्यां द्वे' सूत्रेण शुद्धं रूपम् अस्ति।

क. कर्ता

ख. कर्त्ता

ग. कर्त्ता कर्ता

घ. किमपि न

७.वर्षर्तु इत्यत्र कः सन्धिः?

क. पूर्वरूपम्

ख. गुणः

ग. सवर्णदीर्घः

घ. वृद्धिः

८.केन सूत्रेण ओदन्तो निपातः प्रगृह्यः संज्ञको भवति?

क. निपात एकाजनाङ्

ख. ओत्

ग. मय उञो वो वा
घ. प्रादयः

९.'यणः प्रतिषेधो वाच्यः' इति वार्तिकेन भवति-
क. यण्
ख. यण्लोपः
ग. यण्लोपनिषेधः
घ. संयोगान्तयण्लोपनिषेधः

१०.'गव्यम्' इत्यत्र अवादेशविधायकं सूत्रमस्ति-
क. एचोऽयवायावः
ख. अणुदित्सवर्णस्य चाप्रत्ययः
ग. वान्तो यि प्रत्यये
घ. अध्वपरिमाणे च

११. 'अत्' इत्यत्र तपरकरणेन कस्य ज्ञानं भवति ?
क. ह्रस्व-अकारस्य
ख. ह्रस्व-अकारस्य तकारस्य च
ग. आकारस्य
घ. उपर्युक्त-सर्वेषाम्

१२. वरदराजाचार्य मते उरण् रपर इति सूत्रे 'रपरः' इत्यनेन कस्य ग्रहणम् ?
क. रेफस्य
ख. रलयोः
ग. रट्लानाम्
घ. रपयोः

१३. 'ते+ इच्छन्ति' इत्यत्र सन्धौ कृते किं रूपम्?
क. त इच्छन्ति।
ख. तविच्छन्ति।
ग. तयीच्छति
घ. त छन्ति

१४. 'एत्येधत्यूठ्सु' इति सूत्रस्य अर्थः अस्ति-
क. अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्।
ख. अवर्णादेजाद्योरेत्येधत्यो परे वृद्धिरेकादेशः स्यात्।
ग. अवर्णादेजाद्योरेत्येधत्योरूठि च परे गुणैकादेशः स्यात्।
घ. एवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्।

१५. 'अक्षौहिणी' इत्यत्र वृद्धिः केन भवति?
क. एत्येधत्यूठ्सु
ख. अक्षादूहिन्यामुपसंख्यानम्
ग. वृद्धिरेचि
घ. वृद्धिरादैच्

१६. एतेषु अशुद्धं रूपम् अस्ति-
क. गङ्गौघः
ख. दैत्यारिः
ग. प्रोहः
घ. उपेतः

१७. 'प्राच्छति' इत्यस्य सन्धिविच्छेदः अस्ति-

क. प्र+ अच्छति

ख. प्र +ऋछति

ग. प्रा+ ऋर्च्छति

घ. प्र+ ऋच्छति

१८. अयं प्रादिसमूहः शुद्धः अस्ति-

क. प्र परा अप सम अनु अव

ख. निस् निर दुस् दुर वि आङ्

ग. नि अधि अपि अति सु

घ. उद् अभि प्रति पर उपि

१९. ओमाङोश्च इति सूत्रस्य अर्थः अस्ति-

क. ओमि आङि पररूपमेकादेशः स्यात्।

ख. ओमि आङि चात्परे पूर्वरूपमेकादेशः स्यात्।

ग. ओमि आङि चात्परे गुणैकादेशः स्यात्।

घ. ओमि आङि चात्परे पररूपमेकादेशः स्यात्।

२०.'एङः पदान्तादति' सूत्रेण भवति-

क. पूर्वरूपम्

ख. गुणः

ग. पररूपम्

घ. पदान्तरूपम्

२१. एतेषु शुद्धं रूपं नास्ति-

क. गोअग्रम्

ख. गवाग्रम्

ग. गौअग्रम्

घ. गोऽग्रम्

२२. आगच्छ कृष्ण३ अत्र गौश्चरति इत्यत्र केन सूत्रेण प्रकृतिवद्भावः?

क. दूराद्धूते च

ख. प्लुतप्रगृह्या अचि नित्यम्॥

ग. प्रकृतिवद्भावे पदान्ते

घ. सर्वत्र विभाषा गोः

२३. 'आ एवं किल तत्' इत्यत्र आकारः अस्ति-

क. ङित्

ख. अङित्

ग. ङिताङित्

घ. आङित्

२४. एतेषु शुद्धं रूपं किम्?

क. किम्वुक्तम्

ख. किमु उक्तम्

ग. उभयम्

घ. उभयं न

२५. 'ऋत्यकः' सूत्रेण भवति-

क. गुणः

ख. ह्रस्वः

ग. वृद्धिः

घ. पररूपम्

अच्सन्धिप्रकरणस्य facebook_videos_links

१८. आगमनविधिना यण्सन्धिः
१९. आगमनविधिना यण्सन्धेरभ्यासः, निगमनविधिना यण्सन्धेः प्रस्तावना
२०. सूत्राणां भेदाः, इको यणचि, तस्मिन्निति निर्दिष्टे पूर्वस्य, स्थानेऽन्तरतमः
२१. अनचि च, झलां जश् झशि, संयोगान्तस्य लोपः, अलोऽन्त्यस्य,(सुद्ध्युपास्यः)
२२. यण्सन्ध्यन्तर्गतानि जिज्ञासापदानि
२३. पूर्वशङ्कासमाधानानि, मद्ध्वरिः, धात्त्रंशः, लाकृतिः
२४. एचोऽयवायावः, यथासंख्यमनुदेशः समानाम्
२५. जिज्ञासा-समाधानानि
२६. वान्तो यि प्रत्यये,(अध्वपरिमाणे च)
२७. अदेङ् गुणः, तपरस्तत्कालस्य, आद्गुणः
२८. पुनः गुणसन्धेरभ्यासः, उपदेशेऽजनुनासिक इत्, उरण् रपरः
२९. रँप्रत्याहारः, कृष्णर्द्धिः, तवल्कारः
३०. श्लोकमाध्यमेन यण्गुणसन्धेरभ्यासः
३१. व्याकरणाध्ययने काठिन्यं तन्निवारणोपायाः।
३२. लोपः शाकल्यस्य, पूर्वत्रासिद्धम्
३३. वृद्धिरादैच्, वृद्धिरेचि
३४. अकः सवर्णे दीर्घः
३५. एत्येधत्यूठ्सु
३६. अक्षादूहिन्यामुपसंख्यानम्
३७. प्रादूहोढोढ्येषैष्येषु, ऋते च तृतीया समासे, प्रवत्सतरकम्बलवसनार्णदशानामृणे
३८. उपसर्गादृति धातौ, उपसर्गाः क्रियायोगे, भूवादयो धातवः
३९. एङि पररूपम्, अचोऽन्त्यादि टि
४०. मार्त्तण्डः, ओमाङोश्च
४१. अन्तादिवच्च, शिवेहि, एङः पदान्तादति
४२. अच्सन्धेरभ्यासः, सर्वत्र विभाषा गोः
४३. अवङ् स्फोटायनस्य, अनेकाल्शित्सर्वस्य, ङिच्च, इन्द्रे च
४४. दूराद्धूते च, प्लुतप्रगृह्या अचि नित्यम्
४५. स्वतन्त्रतादिवसे गीतगायनम्, ईदूदेद्द्विवचनम् प्रगृह्यम्, अदसो मात्
४६. चादयोऽसत्त्वे
४७. प्रादयः, निपात एकाजनाङ्, ओत्
४८. मय उञो वो वा, इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च
४९. अचो रहाभ्यां द्वे, ऋत्यकः
५०. टाइम मेनेजमेन्ट

सूचना— जिस कक्षा के ऊपर क्लिक् करेंगे वह वीडियो खुलेगा। इसके लिए इंटरनेट जुड़ा होना आवश्यक है।

अच्सन्धेः परीक्षणम्

१. देव्युवाच इत्यत्र कः सन्धिः?

क. पूर्वरूपम्

ख. पररूपम्

ग. यण्सन्धिः

घ. अयादिसन्धिः

२.'पितृ + अंशः' इत्यनयोः पदयोः सन्धिपदं भवति

क. पित्रंशः

ख. पित्रांशः

ग. पितरंशः

घ. पितृंशः

३.'अनुभूत्यैकमानाय' सन्धिविच्छेदः अस्ति।

क. अनुभूति + ऐकमानाय

ख. अनुमत + एकमानाय

ग. अनुभूतिक +मानाय

घ. अनुभूति +मानाय

४.'अध्वपरिमाणे च' इति वार्तिकस्य उदाहरणम् अस्ति।

क. नायकः

ख. पावकः

ग. सृष्टिः

घ. गव्यूतिः

५.अ ए ओ इति वर्णानाम् का संज्ञा?

क. अयादिः

ख. यण्

ग. गुणः

घ. वृद्धिः

६.' अचो रहाभ्यां द्वे' सूत्रेण शुद्धं रूपम् अस्ति।

क. कर्ता

ख. कर्त्ता

ग. कर्त्ता कर्ता

घ. किमपि न

७.वर्षर्तु इत्यत्र कः सन्धिः?

क. पूर्वरूपम्

ख. गुणः

ग. सवर्णदीर्घः

घ. वृद्धिः

८.केन सूत्रेण ओदन्तो निपातः प्रगृह्यः संज्ञको भवति?

क. निपात एकाजनाङ्

ख. ओत्

ग. मय उञो वो वा

घ. प्रादयः

९.'यणः प्रतिषेधो वाच्यः' इति वार्तिकेन भवति-

क. यण्
ख. यण्लोपः
ग. यण्लोपनिषेधः
घ. संयोगान्तयण्लोपनिषेधः

१०.'गव्यम्' इत्यत्र अवादेशविधायकं सूत्रमस्ति-
क. एचोऽयवायावः
ख. अणुदित्सवर्णस्य चाप्रत्ययः
ग. वान्तो यि प्रत्यये
घ. अध्वपरिमाणे च

११. 'अत्' इत्यत्र तपरकरणेन कस्य ज्ञानं भवति ?
क. ह्रस्व-अकारस्य
ख. ह्रस्व-अकारस्य तकारस्य च
ग. आकारस्य
घ. उपर्युक्त-सर्वेषाम्

१२. वरदराजाचार्य मते 'उरण् रपर' इति सूत्रे 'रपरः' इत्यनेन कस्य ग्रहणम् ?
क. रेफस्य
ख. रलयोः
ग. रट्लानाम्
घ. रपयोः

१३. 'ते+ इच्छन्ति' इत्यत्र सन्धौ कृते किं रूपम्?
क. त इच्छन्ति।
ख. तविच्छन्ति।
ग. तयीच्छति
घ. त छन्ति

१४. 'एत्येधत्यूठ्सु' इति सूत्रस्य अर्थः अस्ति-
क. अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्।
ख. अवर्णादेजाद्योरेत्येधत्यो परे वृद्धिरेकादेशः स्यात्।
ग. अवर्णादेजाद्योरेत्येधत्योरूठि च परे गुणैकादेशः स्यात्।
घ. एवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्।

१५. 'अक्षौहिणी' इत्यत्र वृद्धिः केन भवति?
क. एत्येधत्यूठ्सु
ख. अक्षादूहिन्यामुपसंख्यानम्
ग. वृद्धिरेचि
घ. वृद्धिरादैच्

१६. एतेषु अशुद्धं रूपम् अस्ति-
क. गङ्गौघः
ख. दैत्यारिः
ग. प्रोहः
घ. उपेतः

१७. 'प्रार्च्छति' इत्यस्य सन्धिविच्छेदः अस्ति-
क. प्र+ अच्छति
ख. प्र +ऋछति
ग. प्रा+ ऋर्च्छति

घ. प्र+ ऋच्छति

१८. अयं प्रादिसमूहः शुद्धः अस्ति—

क. प्र परा अप सम अनु अव

ख. निस् निर दुस् दुर वि आङ्

ग. नि अधि अपि अति सु

घ. उद् अभि प्रति पर उपि

१९. ओमाङोश्च इति सूत्रस्य अर्थः अस्ति-

क. ओमि आङि पररूपमेकादेशः स्यात्।

ख. ओमि आङि चात्परे पूर्वरूपमेकादेशः स्यात्।

ग. ओमि आङि चात्परे गुणैकादेशः स्यात्।

घ. ओमि आङि चात्परे पररूपमेकादेशः स्यात्।

२०.'एङः पदान्तादति' सूत्रेण भवति-

क. पूर्वरूपम्

ख. गुणः

ग. पररूपम्

घ. पदान्तरूपम्

२१. एतेषु शुद्धं रूपं नास्ति-

क. गोअग्रम्

ख. गवाग्रम्

ग. गौअग्रम्

घ. गोऽग्रम्

२२. 'आगच्छ कृष्ण३ अत्र गौश्चरति' इत्यत्र केन सूत्रेण प्रकृतिवद्भावः?

क. दूराद्धूते च

ख. प्लुतप्रगृह्या अचि नित्यम्

ग. प्रकृतिवद्भावे पदान्ते

घ. सर्वत्र विभाषा गोः

२३. 'आ एवं किल तत्' इत्यत्र आकारः अस्ति-

क. ङित्

ख. अङित्

ग. ङिताङित्

घ. आङित्

२४. एतेषु शुद्धं रूपं किम्?

क. किम्वुक्तम्

ख. किमु उक्तम्

ग. उभयम्

घ. उभयं न

२५. 'ऋत्यकः' सूत्रेण भवति-

क. गुणः

ख. ह्रस्वः

ग. वृद्धिः

घ. पररूपम्

उत्तराणि— १-ग २- क ३- क ४- घ ५- ग ६- ग ७- ख ८-ख ९- घ १०-ग ११-क १२- ख १३-क १४- क १५-ख १६- ग १७- घ १८- ग १९- घ २०-क २१-ग २२- ख २३- ख २४- ग २५-ख

अच्सन्धिप्रकरणस्य facebook_videos_links

अच्सन्धेः यू-ट्यूब वीडियोज् लिंक्स्

कृपया अत्र स्पर्शं करोतु

YouTube

संस्कृतसारः

१८. आगमनविधिना यण्सन्धिः
१९. आगमनविधिना यण्सन्धेरभ्यासः, निगमनविधिना यण्सन्धेः प्रस्तावना
२०. सूत्राणां भेदाः, इको यणचि, तस्मिन्निति निर्दिष्टे पूर्वस्य, स्थानेऽन्तरतमः
२१. अनचि च, झलां जश् झशि, संयोगान्तस्य लोपः, अलोऽन्त्यस्य,(सुद्ध्युपास्यः)
२२. यण्सन्ध्यन्तर्गतानि जिज्ञासापदानि
२३. पूर्वशङ्कासमाधानानि, मद्ध्वरिः, धात्त्रंशः, लाकृतिः
२४. एचोऽयवायावः, यथासंख्यमनुदेशः समानाम्
२५. जिज्ञासा-समाधानानि
२६. वान्तो यि प्रत्यये,(अध्वपरिमाणे च)
२७. अदेङ् गुणः, तपरस्तत्कालस्य, आद्गुणः
२८. पुनः गुणसन्धेरभ्यासः, उपदेशेऽजनुनासिक इत्, उरण् रपरः
२९. रँप्रत्याहारः, कृष्णर्द्धिः, तवल्कारः
३०. श्लोकमाध्यमेन यण्गुणसन्धेरभ्यासः
३१. व्याकरणाध्ययने काठिन्यं तन्निवारणोपायाः।
३२. लोपः शाकल्यस्य, पूर्वत्रासिद्धम्
३३. वृद्धिरादैच्, वृद्धिरेचि
३४. अकः सवर्णे दीर्घः
३५. एत्येधत्यूठ्सु
३६. अक्षादूहिन्यामुपसंख्यानम्
३७. प्रादूहोढोढ्येषैष्येषु, ऋते च तृतीया समासे, प्रवत्सतरकम्बलवसनार्णदशानामृणे
३८. उपसर्गादृति धातौ, उपसर्गाः क्रियायोगे, भूवादयो धातवः
३९. एङि पररूपम्, अचोऽन्त्यादि टि
४०. मार्त्तण्डः, ओमाङोश्च
४१. अन्तादिवच्च, शिवेहि, एङः पदान्तादति
४२. अच्सन्धेरभ्यासः, सर्वत्र विभाषा गोः
४३. अवङ् स्फोटायनस्य, अनेकाल्शित्सर्वस्य, ङिच्च, इन्द्रे च
४४. दूराद्धूते च, प्लुतप्रगृह्या अचि नित्यम्
४५. स्वतन्त्रतादिवसे गीतगायनम्, ईदूदेद्द्विवचनम् प्रगृह्यम्, अदसो मात्
४६. चादयोऽसत्त्वे
४७. प्रादयः, निपात एकाजनाङ्, ओत्
४८. मय उञो वो वा, इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च
४९. अचो रहाभ्यां द्वे, ऋत्यकः
५०. टाइम मेनेजमेन्ट

सूचना— जिस कक्षा के ऊपर क्लिक् करेंगे वह वीडियो खुलेगा। इसके लिए इंटरनेट जुड़ा होना आवश्यक है।

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

॥ श्रीवरदराजाचार्यविरचिता ॥

लघुसिद्धान्तकौमुदी

हल्सन्धेः यू-ट्यूब वीडियोज् लिंक्स्

कृपया अत्र स्पर्श करोतु

YouTube

तस्या अयं

हल्सन्धिः

तस्य डिजिटल्-संस्करणम् प्रस्तूयते

परामर्शकौ

प्रो.ब्रजभूषणओझा

प्रो.नीलाभतिवारी

प्रस्तोता

डॉ. श्रीओमशर्मा

मङ्गलाचरणम्

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

We worship the Guru Parampara - starting from Sadasiva, having Shankaracharya in the middle, and upto our present Acharyas.

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ।

I remain saluting to the three sages;
Panini who created the sutras, Katyayana who wrote the vaartika, and Patanjali who wrote the Mahabhashya.

सूचना– अन्तिमे पृष्ठे हल्सन्धिप्रकरणस्य VIDEOS LINKS सन्ति।

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

अथ हल्सन्धिः

लघुसिद्धान्तकौमुदी
(हल्सन्धिः)

हल्सन्धेः भेदाः--

1. श्चुत्वसन्धिः
2. ष्टुत्वसन्धिः
3. जश्त्वसन्धिः
4. अनुनासिकसन्धिः
5. परसवर्णसन्धिः
6. पूर्वसवर्णसन्धिः
7. चर्त्वसन्धिः
8. छत्वसन्धिः
9. अनुस्वार-परसवर्णसन्धिः
10. कुँक्टुँकादि-आगमसन्धिः
11. रुँप्रकरणसन्धिः

संस्कृतसारः

छिद्यन्ते सर्वसंशयाः

श्चुत्वसन्धिः

लघुसिद्धान्तकौमुदी
(हल्सन्धिः)

सूत्रम्- स्तोः श्चुना श्चुः॥ ८,४.४० ॥

सूत्रार्थः- सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः।

स्	त्	थ्	द्	ध्	न्
श्	च्	छ्	ज्	झ्	ञ्

स्-तवर्गः + श्-चवर्गः

श्-चवर्गः + स्-तवर्गः

रामस् + शेते	रामस् + चिनोति
रामश् + शेते	रामश् + चिनोति
रामश्शेते	रामश्चिनोति

सत् + चित्	शार्ङ्गिन् + जयः
सच् + चित्	शार्ङ्गिञ् + जयः
सच्चित्	शार्ङ्गिञ्जयः

श्चुत्वसन्धेः निषेधः

सूत्रम्- शात् ॥ ८,४.४४ ॥

सूत्रार्थः- शात्परस्य तवर्गस्य चुत्वं न स्यात् । विश्नः । प्रश्नः ॥

विश् + नः

विश्नः

प्रश् + नः

प्रश्नः

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

ष्टुत्वसन्धिः

लघुसिद्धान्तकौमुदी
(हल्सन्धिः)

सूत्रम्- ष्टुना ष्टुः ॥ ८,४.४१ ॥

सूत्रार्थः- स्तोः ष्टुना योगे ष्टुः स्यात् ।

रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे ॥

स्	त्	थ्	द्	ध्	न्
ष्	ट्	ठ्	ड्	ढ्	ण्

रामस् + षष्ठः
रामष् + षष्ठः
रामष्षष्ठः

रामस् + टीकते
रामष् + टीकते
रामष्टीकते

पेष् + ता
पेष् + टा
पेष्टा

तद् + टीका
तड् + टीका
तट् + टीका
तट्टीका

चक्रिन् + ढौकसे
चक्रिण् + ढौकसे
चक्रिण्ढौकसे

स्-तवर्गः + ष्-टवर्गः

ष्-टवर्गः + स्-तवर्गः

संस्कृतसारः छिद्यन्ते सर्वसंशयाः

ष्टुत्वसन्धेः निषेधः

लघुसिद्धान्तकौमुदी (हल्सन्धिः)

सूत्रम्- न पदान्ताट्टोरनाम् ॥ ८,४.४२ ॥

सूत्रार्थः- पदान्ताट्टवर्गात्परस्य अनामः= नामभिन्नः स्तोः ष्टुर्न स्यात्।

षट् सन्तः। षट् ते। पदान्तात्किम्? ईट्टे। टोः किम्? सर्पिष्टमम्।

वार्तिकम्- (अनाम्नवतिनगरीणामिति वाच्यम्)

वार्त्तिकार्थः- पदान्ताट्टवर्गात्परस्य नाम्-नवति-नगरी भिन्नस्य स्तोः ष्टुर्न स्यात्।

षण्णाम्। षण्णवतिः। षण्णगर्य्यः॥

सूत्रम्- तोः षि ॥ ८,४.४३ ॥

सूत्रार्थः- (तवर्गस्य षकारे परे) न ष्टुत्वम्।

सन्षष्ठः॥

सन् + षष्ठः

षड् + सन्तः	षड् + ते
षट् सन्तः	षट् ते

ईड् + ते	सर्पिष् + तमम्
ईड् + टे	सर्पिष् + टमम्
ईट् + टे	सर्पिष्टमम्
ईट्टे	

षड् + नाम्	षड् + नवतिः	षड् + नगर्यः
षड् + णाम्	षड् + णवतिः	षड् + णगर्यः
षण् + णाम्	षण्+ णवतिः	षण् + णगर्यः (यरोऽनुनासिकेऽनुनासिको वा)
षण्णाम्	षण्णवतिः	षण्णगर्यः

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

जश्त्वसन्धिः

लघुसिद्धान्तकौमुदी
(हल्सन्धिः)

सूत्रम्- 1. झलां जशो ऽन्ते॥८,२.३९॥

सूत्रार्थः- पदान्ते झलां जशः स्युः। वागीशः॥

2.झलां जश् झशि।।८.४.५३।।

क्	ख्	ग्	घ्		ग् (कण्ठः)
च्	छ्	ज्	झ्	श्	ज् (तालु)
ट्	ठ्	ड्	ढ्	ष्	ड् (मूर्धा)
त्	थ्	द्	ध्	स्	द् (दन्त्यः)
प्	फ्	ब्	भ्		ब् (ओष्ठौ)

1. वाक् + ईशः = वागीशः
2. षष् + आननः = षडाननः
3. स्वर्गात् + अपि = स्वर्गादपि
4. प्राक् + एव = प्रागेव
5. जगत् + गुरुः = जगद्गुरुः
6. सुप् + अन्तः = सुबन्तः
7. त्रिष्टुभ् + आदि = त्रिष्टुबादिः
8. अग्निमथ् + भ्याम् = अग्निमद्भ्याम्

ध्यातव्यः— खरि परे जश्त्वसन्धेः प्रभावो नैव भवति। यथा- जगत् + तिष्ठति = जगत्तिष्ठति

अनुनासिकसन्धिः

सूत्रम्- **यरोऽनुनासिकेऽनुनासिको वा॥ ८,४.४५॥**

सूत्रार्थः- यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्।

वार्तिकम्- **(प्रत्यये भाषायां नित्यम्)**

वार्तिकार्थः- अनुनासिकादौ प्रत्यये परे पदान्तस्य यरो नित्यमनुनासिको भाषायाम् (लोके)।

क्	ख्	ग्	घ्	ङ्
च्	छ्	ज्	झ्	ञ्
ट्	ठ्	ड्	ढ्	ण्
त्	थ्	द्	ध्	न्
प्	फ्	ब्	भ्	म्

ङ् (कण्ठः)
ञ् (तालु)
ण् (मूर्धा)
न् (दन्त्यः)
म् (ओष्ठौ)

1. एतद् + मुरारिः = एतन्मुरारिः
2. वाक् + नियमः वाग् + नियमः = वाङ्नियमः
3. तद् + नः = तन्नः
4. षष् + मुखः षड् + मुखः = षण्मुखः
5. जगत् + नियन्ता = जगन्नियन्ता
6. दिक् + मध्ये दिग् + मध्ये = दिङ्मध्ये
7. तद् + मात्रम् = तन्मात्रम्
8. चिद् + मयम् = चिन्मयम्


ध्यातव्यः— यत्रादौ जश्त्वकार्यं संभवति चेत्तत्करणीयं तत्पश्चादेव अनुनासिकसन्धिः प्रवर्त्तते।

परसवर्णसन्धिः-१

लघुसिद्धान्तकौमुदी (हल्सन्धिः)

सूत्रम्- **तोर्लि ॥ ८,४.६० ॥**

सूत्रार्थः- तवर्गस्य लकारे परे परसवर्णः। तल्लयः। विद्वाँल्लिखति। नस्यानुनासिको लः।



1. तद् + लयः = तल्लयः
2. विद्वान् + लिखति = विद्वाँल्लिखति
3. पठन् + लिखति = पठँल्लिखति
4. जहत् + लक्षणा = जहल्लक्षणा
5. गच्छन् + लक्ष्मणः = गच्छँल्लक्ष्मणः
6. तद् + लीनः = तल्लीनः
7. उद् + लेखः = उल्लेखः
8. यद् + लक्षणम् = यल्लक्षणम्

पूर्वसवर्णसन्धिः

सूत्रम्- उदः स्थास्तम्भोः पूर्वस्य॥ ८,४.४१॥

सूत्रार्थः- उदः परयोः स्थास्तम्भोः पूर्वसवर्णः॥

सूत्रम्- तस्मादित्युत्तरस्य॥ १,१.६७॥

सूत्रार्थः- पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम्॥

सूत्रम्- आदेः परस्य॥ १,१.५४॥

सूत्रार्थः- परस्य यद्विहितं तत्तस्यादेर्बोध्यम्। इति सस्य थः॥

दन्त्य-विवार-श्वास-घोष-महाप्राणः

त् थ् द् ध् न्

उद् + स्थानम्
उद् + थ् थानम्

उद् + स्तम्भनम्
उद् + थ् तम्भनम्

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

पूर्वसवर्णसन्धौ चर्त्वसन्धिः

लघुसिद्धान्तकौमुदी
(हल्सन्धिः)

सूत्रम्- झरो झरि सवर्णे॥ ८,४.६५॥

सूत्रार्थः- हलः परस्य झरो वा लोपः सवर्णे झरि॥

सूत्रम्- खरि च॥ ८,४.५५॥

सूत्रार्थः- खरि झलां चरः। इत्युदो दस्य तः।

उत्थानम्। उत्तम्भनम्॥

उद् + स्थानम्
उद् + थ् थानम्
उद् + थानम्
उत् + थानम्
उत्थानम्

उत्थ्थानम्

उत्थ्तम्भनम्

उद् + स्तम्भनम्
उद् + थ् तम्भनम्
उद् + तम्भनम्
उत् + तम्भनम्
उत्तम्भनम्

1. दिग् + पालः = दिक्पालः
2. विराड् + पुरुषः = विराट्पुरुषः
3. अनुष्टुभ् + छन्दः = अनुष्टुप्छन्दः
4. उद् + पतति = उत्पतति
5. जगद् +पति= जगत्पतिः
6. तादृग् + कर्म = तादृक्कर्म
7. युयुध् + सवः = युयुत्सवः

क्	ख्	ग्	घ्
च्	छ्	ज्	झ्
ट्	ठ्	ड्	ढ्
त्	थ्	द्	ध्
प्	फ्	ब्	भ्

खर्

क् (कण्ठः)
च् (तालु)
ट् (मूर्धा)
त् (दन्त्यः)
प् (ओष्ठौ)

छत्वसन्धिः


लघुसिद्धान्तकौमुदी
(हल्सन्धिः)

सूत्रम्- **शश्छोऽटि॥ ८,४.६३॥**

सूत्रार्थः- (पदान्तात्) झयः परस्य शस्य छो वाटि। तद् शिव इत्यत्र दस्य श्चुत्वेन जकारे कृते खरि चेति जकारस्य चकारः। तच्छिवः, तच्शिवः।

वार्तिकम्- **(छत्वममीति वाच्यम्)**

वार्तिकार्थः- सूत्रे अटि इति विहाय अमि इति वक्तव्यम्। (पदान्तात्) झयः परस्य शस्य छो वामि।) तच्छ्लोकेन॥



तद् + शिव

तज् + शिव (स्तोः श्चुना श्चुः-८.४.४०)

तच् + शिव (खरि च - ८.४.५५)

तच् + छिव (शश्छो ऽटि- ८.४.६३)

1.तच्छिवः, 2.तच्शिवः।

तद्/ ज्/च् + श्लोकेन

1.तच्छ्लोकेन,2.तच्श्लोकेन।

1. **मृद्-ज्-च् + शकटिकम् = मृच्छकटिकम्**
2. **वाक्+ शस्त्रम् = वाक्छस्त्रम्**
3. **तद् + शिलष्टः = तच्छिष्टः**
4. **यद् + श्रद्धः = यच्छ्रद्धः**

(पदान्ते) अनुस्वार-परसवर्णसन्धिः

लघुसिद्धान्तकौमुदी (हल्सन्धिः)

सूत्रम्- **मोऽनुस्वारः॥ ८,३.२३॥**

सूत्रार्थः- मान्तस्य पदस्यानुस्वारो हलि। हरिं वन्दे॥

सूत्रम्- **वा पदान्तस्य॥ ८,४.५९॥** (त्वङ्करोषि, त्वं करोषि)

सूत्रार्थः- पदान्तानुस्वारस्य ययि परे परसवर्णो वा स्यात्।



1. हरिम् + वन्दे = हरिवँ् वन्दे, हरिं वन्दे
2. त्वम् + करोषि = त्वङ्करोषि, त्वं करोषि
3. अहम् + गच्छामि = अहङ्गच्छामि, अहं गच्छामि
4. अहम् + लिखामि = अहलँ् लिखामि, अहं लिखामि
5. गुरुम् +नमति= गुरुन्नमति, गुरुं नमति
6. शत्रुम् + जयति = शत्रुञ्जयति,शत्रुं जयति
7. सम् + वत्सरः = सँव्वत्सरः,संवत्सरः



ङ्	क्	ख्	ग्	घ्	ङ्
ञ्	च्	छ्	ज्	झ्	ञ्
ण्	ट्	ठ्	ड्	ढ्	ण्
न्	त्	थ्	द्	ध्	न्
म्	प्	फ्	ब्	भ्	म्
यँ्	य्				
वँ्	व्				
लँ्	ल्				

ध्यातव्यः- रेफोष्माणानां सवर्णाः न सन्ति। अतः -कुलं रोदिति अत्र परसवर्णो न भवति।

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

(अपदान्ते) अनुस्वार-परसवर्णसन्धिः


लघुसिद्धान्तकौमुदी (हल्सन्धिः)

सूत्रम्- नश्चापदान्तस्य झलि॥ ८,३.२४॥

सूत्रार्थः- नस्य मस्य चापदान्तस्य झल्यनुस्वारः। यशांसि। आक्रंस्यते। झलि किम्? मन्यते॥

सूत्रम्- अनुस्वारस्य ययि परसवर्णः॥ ८,४.५८॥

सूत्रार्थः- स्पष्टम्। शान्तः॥



मन् +यते
मन्यते

1. यशान् + सि = यशांसि
2. आक्रम् + स्यते = आक्रंस्यते
3. शाम् + तः = शान्तः
4. अन्+ कितः= अङ्कितः
5. कुन् +ठितः= कुण्ठितः
6. गुम् + फितः= गुम्फितः
7. पयान् + सि = पयांसि

अनुस्वारसन्धेः निषेधः

सूत्रम्- **मो राजि समः क्वौ॥ ८,३.२५॥**

सूत्रार्थः- क्विँबन्ते राजतौ = क्विँप् प्रत्ययान्ते राजशब्दे परे समो मस्य म एव स्यात्। सम्राट्॥

सूत्रम्- **हे मपरे वा॥ ८,३.२६॥**

सूत्रार्थः- मपरे= मः परः यस्मात् स मपरः (तादृशे) हकारे परे मस्य मो वा। किम् ह्मलयति, किं ह्मलयति। वार्तिकम्- (यवलपरे यवला वा) –अर्थः- यवलपरे हकारे परे मकारस्य क्रमशो यवला वा भवन्ति। कियँ ह्यः, किं ह्यः। किवँ ह्वलयति, किं ह्वलयति। किलँ ह्लादयति, किं ह्लादयति॥

सूत्रम्- **नपरे नः॥ ८,३.२७॥**

सूत्रार्थः- नपरे हकारे मस्य नो वा। किन् ह्नुते, किं ह्नुते॥

सम् + राट्	**किम् + ह्मलयति**
सम्राट्	१.किम् ह्मलयति,
	२.किं ह्मलयति
किम् + ह्यः	**किम् + ह्वलयति**
१.कियँ ह्यः	१.किवँ ह्वलयति
२.किं ह्यः	२. किं ह्वलयति
किम् + ह्लादयति	**किम् + ह्नुते**
१.किलँ ह्लादयति	१.किन् ह्नुते
२.किं ह्लादयति	२.किं ह्नुते

आगमसन्धौ कुँक्टुँकौ

लघुसिद्धान्तकौमुदी (हल्सन्धिः)

सूत्रम्- आद्यन्तौ टकितौ॥ १,१.४६॥

सूत्रार्थः- टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः॥



प्राङ् + षष्ठः	सुगण् + षष्ठः
प्राङ् क् + षष्ठः	सुगण् ट् + षष्ठः
प्राङ् ख् + षष्ठः	सुगण् ठ् + षष्ठः
१.प्राङ्ख्षष्ठः	१. सुगण्ठ्षष्ठः
२.प्राङ्क्षष्ठः	२. सुगण्ट्षष्ठः
३.प्राङ् षष्ठः	३. सुगण् षष्ठः

सूत्रम्- ङ्णोः कुँक्टुँक् शरि॥ ८,३.२८॥

सूत्रार्थः- वा स्तः। (ङकारणकारयोः क्रमेण कुँक्टुँकागमौ स्तो वा शरि परे।)

वार्तिकम्- (चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्)। अर्थः- शरि परे चयः(वर्गप्रथमवर्णाः) द्वितीयवर्णत्वेन विकल्पेन प्रयुज्यते पौष्करसादिमते। प्राङ्ख् षष्ठः, प्राङ्क्षष्ठः, प्राङ् षष्ठः। सुगण्ठ् षष्ठः सुगण्ट् षष्ठः, सुगण् षष्ठः॥

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

आगमसन्धौ धुँट्

लघुसिद्धान्तकौमुदी (हल्सन्धिः)

सूत्रम्- डः सि धुँट् ॥ ८,३.२९ ॥

सूत्रार्थः- डात्परस्य सस्य धुँड्वा। षट्त्सन्तः, षट् सन्तः ॥

सूत्रम्- नश्च ॥ ८,३.३० ॥

सूत्रार्थः- नान्तात् (पदात्) परस्य सस्य धुँड्वा। सन्त्सः, सन्सः ॥



1. लिड् + सु = लिटत्सु, लिट्सु
2. षड् + सुखानि = षट्त्सुखानि, षट्सुखानि
3. षड् + सन्निकर्षाः = षट्त्सन्निकर्षाः, षट्सन्निकर्षाः
4. तुराषाड् + संसरति = तुराषाट्त्संसरति, तुराषाट् संसरति

षड् + सन्तः = २. षट् सन्तः
षड् + ध् सन्तः
षड् + त् सन्तः
षट् + त् सन्तः = १. षट्त्सन्तः

सन् + सः = २. सन्सः
सन् + ध् सः
सन् + त् सः = १. सन्त्सः

1. अस्मिन् + समये = अस्मिन्त्समये, अस्मिन्समये
2. भवान् + सखा = भवान्त्सखा, भवान्सखा
3. धनवान् + सहोदरः = धनवान्त्सहोदरः, धनवान्सहोदरः

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः


आगमसन्धौ ङमुँडागमः

लघुसिद्धान्तकौमुदी
(हल्सन्धिः)

सूत्रम्- ङमो ह्रस्वादचि ङमुँण्-नित्यम्॥ ८,३.३२॥

सूत्रार्थः- ह्रस्वात्परे यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो ङमुँट्।

प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः॥



1. गच्छन् + अस्मि = गच्छन्नस्मि
2. तस्मिन् + इति = तस्मिन्निति
3. तिर्यङ् + अत्र = तिर्यङ्ङत्र
4. लिखन् + एव = लिखन्नेव
5. तिङ् + अतिङः = तिङ्ङतिङः
6. एकस्मिन् + उद्याने = एकस्मिन्नुद्याने
7. सुगण् + आलयः = सुगण्णालयः

प्रत्यङ् + आत्मा	सुगण् + ईशः	सन् + अच्युतः
प्रत्यङ् + ङ् आत्मा	सुगण् + ण् ईशः	सन् + न् अच्युतः
प्रत्यङ्ङात्मा	सुगण्णीशः	सन्नच्युतः

हल्सन्धौ रुँप्रकरणम्

लघुसिद्धान्तकौमुदी (हल्सन्धिः)

सूत्रम्- **समः सुँटि॥ ८,३.५॥**

सूत्रार्थः- समो रुँः सुँटि॥

सूत्रम्- **अत्रानुनासिकः पूर्वस्य तु वा॥ ८,३.२॥**

सूत्रार्थः- अत्र रुँ-प्रकरणे रोः पूर्वस्यानुनासिको वा॥

सूत्रम्- **अनुनासिकात्परोऽनुस्वारः॥ ८,३.४॥**

सूत्रार्थः- अनुनासिकं (पक्षं) विहाय रोः पूर्वस्मात् परोऽनुस्वारागमः॥

सूत्रम्- **खरवसानयोर्विसर्जनीयः॥ ८,३.१५॥**

सूत्रार्थः- खरि अवसाने च पदान्तस्य रेफस्य विसर्गः।

वार्तिकम्- (संपुंकानां (विसर्गाणां) सो वक्तव्यः)। सँस्स्कर्ता, संस्स्कर्ता॥

सम् + स्कर्ता	
सर् + स्कर्ता	
सँर् + स्कर्ता	संर् + स्कर्ता
सँ : + स्कर्ता	सं : + स्कर्ता
सँस् + स्कर्ता	संस् + स्कर्ता
सँस्स्कर्ता	संस्स्कर्ता

हल्सन्धौ रुँप्रकरणम्

सूत्रम्- पुमः खय्यम्परे॥ ८,३.६॥

सूत्रार्थः- अम्परे खयि पुमो रुँः। पुँस्कोकिलः, पुंस्कोकिलः॥

सूत्रम्- नश्छव्यप्रशान्॥ ८,३.७॥

सूत्रार्थः- अम्परे छवि नान्तस्य पदस्य रुँः न तु प्रशान्शब्दस्य॥

सूत्रम्- विसर्जनीयस्य सः॥ ८,३.३४॥

सूत्रार्थः- खरि। चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व। अप्रशान् किम्? प्रशान्तनोति। पदस्येति किम्? हन्ति॥

न् (पदम्) → रुँः
छव् > अम्

: → स्
खर्

पुम् + कोकिलः
पुर् + कोकिलः
पुँर् + कोकिलः　　पुंर् + कोकिलः
पुँ : + कोकिलः　　पुं : + कोकिलः
पुँस् + कोकिलः　　पुंस् + कोकिलः
पुँस्कोकिलः,　　पुंस्कोकिलः

चक्रिन् + त्रायस्व
चक्रिर् + त्रायस्व
चक्रिँर् + त्रायस्व　　चक्रिंर् + त्रायस्व
चक्रिँ : + त्रायस्व　　चक्रिं : + त्रायस्व
चक्रिँस्त्रायस्व　　चक्रिंस्त्रायस्व

हल्सन्धौ रुँप्रकरणम्

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

लघुसिद्धान्तकौमुदी
(हल्सन्धिः)

सूत्रम्- **नृन् पे ॥ ८,३.१० ॥**

सूत्रार्थः- नृन् इत्यस्य रुँर्वा पे= पकारे परे ॥

सूत्रम्- **कुप्वोः ×क ×पौ च ॥ ८,३.३७ ॥**

सूत्रार्थः- कवर्गे पवर्गे च विसर्गस्य ×क ×पौ = जिह्वामूलीय-उपध्मानीयौ

स्तः, चाद्विसर्गः। नॄँ× पाहि, नॄँः पाहि, नृं× पाहि नृंः पाहि, नृन्पाहि ॥

नृन् + पाहि = 5.नृन्पाहि

नृर् + पाहि

नॄँर् + पाहि　　नृंर् + पाहि

3.नॄँ : + पाहि　　4.नृं : + पाहि

1.नॄँ × + पाहि　　2.नृं × + पाहि

सूत्रम्- **तस्य परमाम्रेडितम् ॥ ८,१.२ ॥**

सूत्रार्थः- द्विरुक्तस्य परम् आम्रेडितं स्यात् ॥

सूत्रम्- **कानाम्रेडिते ॥ ८,३.१२ ॥**

सूत्रार्थः- कान्नकारस्य रुँः स्यादाम्रेडिते। काँस्कान्, कांस्कान् ॥

कान् + कान्

कार् + कान्

काँर् + कान्　　कांर् + कान्

काँ : + कान्　　कां : + कान्

1.काँस् + कान्　　2.कांस् + कान्

तुँक्-आगमसन्धिः

लघुसिद्धान्तकौमुदी (हल्सन्धिः)

सूत्रम्- **छे च॥ ६,१.७३॥**

सूत्रार्थः- ह्रस्वस्य छे तुँक्। शिवच्छाया॥

सूत्रम्- **पदान्ताद्वा॥ ६,१.७९॥**

सूत्रार्थः- दीर्घात् पदान्तात् छे तुँग्वा। लक्ष्मीच्छाया, लक्ष्मी छाया॥

1. वृक्षच्छाया
2. संस्कृतच्छात्रः
3. अक्षरच्छन्दसः
4. श्वेतच्छत्रम्
5. कविभास्करच्छात्रावासः
6. कथाच्छलेन कथाछलेन
7. मातृच्छाया
8. मात्राच्छन्दः मात्राछन्दः
9. सच्छत्रः
10. ऐतरेयच्छान्दोग्ये

ह्रस्वस्य अ-इ-उ-ऋ

पदान्त-दीर्घस्य आ-ई-ऊ-ॠ

तुँक्
त्(आगम)
द्(जश्त्व)
ज्(श्चुत्व)
च्(चर्त्व)

छ्

शिव + छाया	लक्ष्मी + छाया
शिवत् + छाया	लक्ष्मीत् + छाया
शिवद् + छाया	लक्ष्मीद् + छाया
शिवज् + छाया	लक्ष्मीज् + छाया
शिवच्छाया	लक्ष्मीच्छाया

हल्सन्धेः परिशिष्टभागः

1. चवर्गस्य कवर्गादेशविधानम् (कुत्वम्)

सूत्रम्- 1.चोः कुः।। 2. क्विँन्प्रत्ययस्य कुः।।

सूत्रार्थः- चवर्ग को कवर्गादेश होता है। झल् परे रहते या पदान्त में।

2. हकारस्य ढकारविधानम् (ढत्वम्)

सूत्रम्- हो ढः - हकार को ढकार होता है। झल् परे रहते या पदान्त में।

3. हकारस्य घकारविधानम् (घत्वम्)

सूत्रम्- 1.दादेर्धातोर्घः- दकारादि धातु के हकार को घकार होता है। झल् परे रहते या पदान्त में।

सूत्रम्- वा द्रुहमुहष्णुहष्णिहाम्- द्रुहादि धातुओं के हकार को घकार विकल्प से होता है। झल् परे रहते या पदान्त में।

4. हकारस्य धकारविधानम्(धत्वम्)

सूत्रम्- नहो धः

सूत्रार्थः- नह् धातु के हकार को धकार होता है। झल् परे रहते या पदान्त में।

निवेदनम्

यह पठन-पाठनसामग्री ‘संस्कृतव्याकरण’ में प्रवेशेच्छुक छात्राध्यापकों के हेतु ‘संस्कृतसारः’ इस समाजसेविका संस्था द्वारा संस्कृतभाषा की सेवार्थ प्रस्तुत की जा रही है।

अतः आपसे निवेदन है कि इन ‘लघुसिद्धान्तकौमुदी’ स्लाइड्स् व वीडियोज् का अपने पठन-पाठन में पर्याप्त उपयोग कर संस्कृत की सेवा में हमारा सहयोग करें।

दिनाङ्कः-

15.12.2020

निवेदकः-

संस्कृतशिक्षा-परिवारः
(सम्पर्कसूत्रम्-9424692199)
sanskritshiksha2020@gmail.com

हल्सन्धेः परीक्षणम्

१.शार्ङ्गिञ्जयः इत्यस्य सन्धिविच्छेदोऽस्ति-

क. शार्ङ्गिञ् जयः
ख. शार्ङ्गिन् जयः
ग. शार्ङ् जयः
घ. शार्ङ् अजयः

२.ष्टुत्वविषये एषु समीचीनं कथनं नास्ति-

क. स्तोः ष्टुना योगे ष्टुः स्यात्।
ख. रामष्टीकते इत्यत्र सकारस्य स्थाने ष्टुत्वं षकारः।
ग. पेष् ता इत्यत्र षकारस्य स्थाने ष्टुत्वे टकारः।
घ. न पदान्ताट्टोरनाम् इति ष्टुत्वसन्धेः निषेधसूत्रं वर्त्तते।

३.षण्णवतिः इति प्रयोगस्य समीचीना प्रक्रिया आस्ति-

क. षड्+ नवति इति स्थिते नकारस्य ष्टुत्वे णकारे, डकारस्य अनुनासिकत्वे णकारे कृते षण्णवतिः सिद्धम्।
ख. षट् +नवति इति स्थिते नकारस्य ष्टुत्वे णकारे, टकारस्य अनुनासिकत्वे णकारे कृते षण्णवतिः सिद्धम्।
ग. षन्+ नवति इति स्थिते नकारस्य ष्टुत्वे णकारे, नकारस्य अनुनासिकत्वे णकारे कृते षण्णवतिः सिद्धम्।
घ. षड्+ अवति इति स्थिते डकारस्य णकारे, द्वित्वे च कृते षण्णवतिः सिद्धम्।

४. 'सन् षष्ठः' अत्र सन्धौ कृते रूपं भवति-

क. सण्षष्ठः
ख. सण्णष्ठः
ग. सन्षष्ठः
घ. संषष्ठः

५. 'तन्मात्रम्' अत्र किं जातम् ?

क. श्चुत्वम्
ख. परसवर्णः
ग. अनुनासिकत्वम्
घ. पूर्वसवर्णः

६.नकारस्य स्थाने अनुनासिको भवति-

क. मकारः
ख. नकारः
ग. ङकारः
घ. लँकारः

७.उदः स्थास्तम्भोः पूर्वस्य इति सूत्रेण भवति-

क. पूर्वसवर्णः

ख. परसवर्णः

ग. अनुनासिकः

घ. पूर्वरूपम्

८. उद् स्थानम् इत्यत्र सकारस्य स्थाने पूर्वसवर्णो भवति-

क. षकारः

ख. पकारः

ग. मकारः

घ. थकारः

९.हकारस्य स्थाने पूर्वसवर्णो भवति-

क. वर्गचतुर्थः

ख. वर्गतृतीयः

ग. वर्गद्वितीयः

घ. वर्गप्रथमः

१०. 'तन्न' इत्यत्र सन्धिर्वर्त्तते-

क. जश्त्वम्

ख. चर्त्वम्

ग. अनुनासिकत्वम्

घ. परसवर्णत्वम्

११. समीचीनं मेलनं कुरुत-

(अ)	(ब)
१.भेत्तुम्	ष्टुत्वम्
२.वाङ्मयः	पूर्वसवर्णः
३.पेष्टा	चर्त्वम्
४.अञ्झीनम्	अनुस्वारपरसवर्णश्च
५.अङ्कितः	अनुनासिकत्वम्

क. १,३,४,५,२

ख. ३,५,१,२,४

ग. ५,२,१,३,४

घ. ४,२,३,१,५

१२. 'शश्छोऽटि' इति सूत्रविषये इदं कथनं संगतं नास्ति-

क. अनेन झयः परस्य शकारस्य छकारो भवति।

ख. 'तच्छिवः' इत्यत्र शकारस्य छकारोऽनेन भवति।

ग. अचः परस्य शकारस्य छकारो भवति।

घ. अनेन विकल्पेन शकारस्य छकारो भवति।

१३. 'नश्चापदान्तस्य झलि' इति सूत्रस्यार्थोऽस्ति-

क. मस्य चापदान्तस्य झल्यनुस्वारः।

ख. नस्य मस्य च पदान्तस्य झल्यनुस्वारः।

ग. नस्य लस्य चापदान्तस्य झल्यनुस्वारः।

घ. नस्य मस्य चापदान्तस्य झल्यनुस्वारः।

१४. शुद्धं रूपं चिनुत-

क. शांतः

ख. शान्तः

ग. शांतः, शान्तः

घ. शाम्तः

१५. 'सम् राट्' इत्यत्र 'मोऽनुस्वारः' इति सूत्रं कथं न प्रवर्त्तते ?

क. मकारस्य मकारविधानात्

ख. मकारस्य असिद्धत्वात्

ग. हल्परत्वाभावात्

घ. पदान्तत्वाभावात्

१६. 'प्राङ्क्षष्ठः' अत्र कः आगमः?

क. धुँट्

ख. कुँक्

ग. टुँक्

घ. नुँट्

१७. 'सन्+ शम्भुः' अत्र सन्धीनां समीचीनक्रमोऽस्ति-

क. श्चुत्वम्, जश्त्वम्, छत्वम्, लोपः

ख. जश्त्वम्, श्चुत्वम्, लोपः, छत्वम्

ग. तुँक्, श्चुत्वम्, श्चुत्वम्, छत्वम्, लोपः

घ. तुँक्, छत्वम्, श्चुत्वम्, लोपः

१८. 'तस्मिन्नद्रौ' अत्र केन सूत्रेण क आगमः ?

क. नश्च इति सूत्रेण नुँट्

ख. ङमो ह्रस्वादचि ङमुँण् नित्यम् इति सूत्रेण ङमुँट्

ग. ङणोः कुँक्टुँक् शरि इति सूत्रेण टुँक्

घ. नपरे नः इति सूत्रेण न-आगमः

१९. 'सँस्स्कर्त्ता' इत्यस्य सन्धिविच्छेदो वर्त्तते-

क. सम्+ स्कर्त्ता

ख. सम्+ कर्त्ता

ग. सँस्म्+ स्कर्त्ता

घ. सँस्कार+ कर्त्ता

२०. 'चक्रिँस्त्रायस्व' इति प्रयोगविषये इदं कथनम् असमीचीनम्-

क. अत्र नश्छव्यप्रशान् इति सूत्रेण रुँ नास्ति।

ख. अत्र विसर्जनीयस्य सः इति सूत्रेण सकारादेशो भवति।
ग. संपुंकानां सो वक्तव्यः इति वार्तिकं नैवात्र प्रवर्त्तते।
घ. अत्र अनुनासिकपक्षे अनुस्वारपक्षे च रूपं भवति।

२१. 'कस्मिँश्चित्' इत्यत्र केन सूत्रेण किम् अभवत्?
क. शि तुँक् इति सूत्रेण तुँक्
ख. यरोनुनासिकेऽनुनासिको वा इति सूत्रेण अनुनासिकः
ग. नश्छव्यप्रशान् इति सूत्रेण रुँः
घ. विसर्जनीयस्य सः इति सूत्रेण विसर्गः

२२.नृन् + पाहि इत्यस्य कति रूपाणि भवन्ति ?
क. त्रयः
ख. पञ्च
ग. द्वौ
घ. षट्

२३. आम्रेडितसंज्ञा कस्य भवति ?
क. द्विरुक्तस्य
ख. द्विरुक्ते पूर्वस्य
ग. द्विरुक्ते उभयस्य
घ. द्विरुक्ते परस्य

२४. शिवच्छाया अत्र तुँगागमः भवति-
क. ह्रस्वस्य
ख. छकारस्य
ग. वकारस्य
घ. शिवस्य

२५. एतेषु शुद्धं रूपं नास्ति-
क. लक्ष्मीछाया
ख. लक्ष्मीच्छाया
ग. शिवछाया
घ. शिवच्छाया

उत्तराणि— १-ख २-ग ३-क ४-ग ५-ग ६-घ ७-क ८-घ ९-क १०-ग ११-ख १२-ग १३-घ १४-ख १५-क १६-ख १७-ग १८-ख १९-क २०-क २१-ग २२-ख २३-घ २४-क २५-ग

हल्सन्धिप्रकरणस्य facebook_videos_links

1. हल्सन्धेर्भेदाः,श्चुत्वसन्धिः
2. पूर्वसन्धेरभ्यासः, ष्टुत्वसन्धिः
3. ष्टुत्वसन्धेर्निषेधः
4. जश्त्वसन्धिः
5. जश्त्वसन्धेरभ्यासः, अनुनासिकसन्धिः
6. परसवर्णसन्धिः, पूर्वसवर्णसन्धिः-1
7. पूर्वसवर्णसन्धिः-2, चर्त्वसन्धिः
8. छत्वसन्धिः
9. (पदान्ते,अपदान्ते) अनुस्वार-परसवर्णसन्धिः,
10. अनुस्वारसन्धेर्निषेधः
11. आगमसन्धिः— कुँक्,टुँक्
12. आगमसन्धिः— धुँट्,तुँक्
13. आगमसन्धौ— ङुँट्,णुट्,नुँट्
14. रुँप्रकरणम्, समः सुँटि
15. रुँप्रकरणम्— पुमःखय्यम्परे, नश्छव्यप्रशान्
16. रुँसन्धिः— नॄन् पे, कानाम्रेडिते
17. षष्ठाध्यायस्य तुँगागमसन्धिः
18. हल्सन्धेः परिशिष्टम्,(कुत्व-ढत्व-घत्व-धत्वेत्यादयः)

सूचना— जिस कक्षा के ऊपर क्लिक् करेंगे वह वीडियो खुलेगा। इसके लिए इंटरनेट जुड़ा होना आवश्यक है।

॥ श्रीवरदराजाचार्यविरचिता ॥

लघुसिद्धान्तकौमुदी

विसर्गसन्धेः यू-ट्यूब वीडियोज् लिंक्स्

कृपया अत्र स्पर्श करोतु

YouTube

तस्या अयं

विसर्गसन्धिः

परामर्शकौ

प्रो. ब्रजभूषणओझा

प्रो. नीलाभतिवारी

तस्य डिजिटल्-संस्करणम्
प्रस्तूयते

प्रस्तोता

डॉ. श्रीओमशर्मा

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

निवेदनम्

यह पठन-पाठनसामग्री 'संस्कृतव्याकरण' में शीघ्र प्रवेशेच्छुक-छात्राध्यापकों के हेतु 'संस्कृतसारः' इस समाजसेविका संस्था द्वारा संस्कृतभाषा की सेवार्थ प्रस्तुत की जा रही है। अतः आपसे निवेदन है कि इन 'लघुसिद्धान्तकौमुदी' स्लाइड्स् व वीडियोज् का अपने पठन-पाठन में पर्याप्त उपयोग कर संस्कृत की सेवा में हमारा सहयोग करें।

दिनाङ्कः-
22.12.2020

सूचना—इस प्रकरण के पूर्ण एवं विधिवत् ज्ञान हेतु अन्तिम पृष्ठ पर दिए गये वीडियोज् लिंकस् पर क्लिक करें।

निवेदकः-
संस्कृतशिक्षा-परिवारः
(सम्पर्कसूत्रम्-9424692199)
sanskritshiksha2020@gmail.com

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

अथ विसर्ग-विपरिणामाः

लघुसिद्धान्तकौमुदी
(विसर्गसन्धिः)

१.य्	२.र्	३.श्	४.ष्
५.स्	६.ओ	७.ᳵक,ᳵख	८.ᳶप,ᳶफ
	९. ✗	१०. :	

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

अथ विसर्गस्य उत्पतेर्मूलं कारणम्

लघुसिद्धान्तकौमुदी
(विसर्गन्धिः)



संस्कृतसारः

विसर्गसन्धौ (स् -श् -ष्- :) इति

लघुसिद्धान्तकौमुदी (विसर्गन्धिः)

सूत्रम्- **स-सजुषो रुँः ॥ ८,२.६६ ॥**

सूत्रार्थः- पदान्तस्य सस्य सजुषश्च रुः स्यात् ॥

1.पदान्ते स्

2.सजुष्

र्

सूत्रम्- **विसर्जनीयस्य सः ॥ ८,३.३४ ॥**

सूत्रार्थः- खरि(विसर्जनीयस्य सः स्यात्) । विष्णुस्त्राता ॥

विष्णुस् + त्राता

विष्णुर् + त्राता (स-सजुषो रुः)

विष्णु : + त्राता (खरवसानयोर्विस...)

विष्णुस् + त्राता (विसर्जनीयस्य सः)

विष्णुस्त्राता

:

स्

खय्

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

विसर्गसन्धौ (स् - श् - ष् - ॅ - :) इति

लघुसिद्धान्तकौमुदी
(विसर्गसन्धिः)

सूत्रम्- वा शरि ॥ ८,३.३६ ॥

सूत्रार्थः- शरि विसर्गस्य विसर्गो वा। हरिः शेते, हरिश्शेते ॥

हरिस् + शेते

हरिर् + शेते (स-सजुषो रुँः)

हरि : + शेते (खरवसानयोर्विस...)

हरि : + शेते (वा शरि) 1. हरिः शेते

हरिस् + शेते (विसर्जनीयस्य सः) 2. हरिश्शेते

विसर्गाणां स्थाने खरि परे किं किं भवति ?

श्—> च् छ् श्

ष्—> ट् ठ् ष्

स्—> त् थ् स्

ॅ, : —> क् ख् प् फ्


: —> श् ष् स्

शर्

विसर्गसन्धौ ओ-कारः

लघुसिद्धान्तकौमुदी
(विसर्गसन्धिः)

- सूत्रम्- अतो रोरप्लुतादप्लुते ॥ ६,१.११३॥
- सूत्रार्थः- अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। शिवोऽर्च्यः॥
- सूत्रम्- हशि च ॥ ६,१.११४॥
- सूत्रार्थः- तथा = अप्लुतादतः परस्य रोरुः स्याद् हशि। शिवो वन्द्यः॥



अ ह् य् व् र्
ल् ञ् म् ङ्
ण् न् झ् भ्
घ् ढ् ध् ज् ब्
ग् ड् द्

शिवस् + अर्च्यः
शिवर् + अर्च्यः (स-सजुषो रुँः)
शिव उ + अर्च्यः (अतो रोरप्लुतादप्लुते)
शिव् ओ + अर्च्यः (आद्गुणः)
शिवोऽर्च्यः (एङः पदान्तादति)

शिवस् + वन्द्यः
शिवर् + वन्द्यः (स-सजुषो रुँः)
शिव उ + वन्द्यः (हशि च)
शिव् ओ + वन्द्यः (आद्गुणः)
शिवो वन्द्यः

विसर्गसन्धौ र्-कारः

- यत्र इच्-प्रत्याहारात् परे विसर्गः,
  ततःपरे अश्-प्रत्याहारश्चेत्तदा विसर्गस्य स्थाने रेफादेशः।

- यत्र अकारात् परे र-जातः विसर्गः(रुँः इत्यस्माद् भिन्नो विसर्गः) ततःपरे
  अश्-प्रत्याहारश्चेत्तदा विसर्गस्य स्थाने रेफादेशः।

इ उ ऋ लृ ए ओ ऐ औ

ः

र्

अ इ उ ऋ लृ ए ओ ऐ औ
ह् य् व् र् ल् ञ् म् ङ् ण् न्
झ् भ् घ् ढ् ध् ज् ब् ग् ड् द्

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

विसर्गसन्धौ य-कारः लोपश्च

लघुसिद्धान्तकौमुदी
(विसर्गसन्धिः)

- सूत्रम्- भोभगोअघोअपूर्वस्य योऽशि॥ ८,३.१७॥
- सूत्रार्थः- एतत्पूर्वस्य = भो-भगो-अघो-अवर्णपूर्वस्य रोर्यादेशोऽशि। देवा इह, देवायिह। भोस् भगोस् अघोस् इति सान्ता निपाताः। तेषां रोर्यत्वे कृते॥
- सूत्रम्- हलि सर्वेषाम् ॥ ८,३.२२॥
- सूत्रार्थः- भोभगोअघोअपूर्वस्य यस्य लोपः स्याद्धलि। भो देवाः। भगो नमस्ते। अघो याहि॥


देवास् + इह

देवार् + इह (स-सजुषो रुः)

देवाय् + इह(भोभगोअघो...)

देवा+ इह(लोपः शाकल्यस्य)

1. देवा इह 2.देवायिह



भोस् + देवाः	भगोस् + नमस्ते	अघोस् + याहि
भोर् + देवाः	भगोर् + नमस्ते	अघोर् + याहि
भोय् + देवाः	भगोय् + नमस्ते	अघोय् + याहि
भो देवाः।	भगो नमस्ते।	अघो याहि॥

संस्कृतसारः छिद्यन्ते सर्वसंशयाः

विसर्गसन्धौ र्-कारः लोपश्च

लघुसिद्धान्तकौमुदी (विसर्गसन्धिः)

- सूत्रम्- रोऽसुपि ॥ ८,२.६९ ॥
- सूत्रार्थः- अह्नो रेफादेशो न तु सुपि। अहरहः। अहर्गणः॥
- सूत्रम्- रो रि ॥ ८,३.१४ ॥
- सूत्रार्थः- रेफस्य रेफे परे लोपः॥
- सूत्रम्- ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥ ६,३.१११ ॥
- सूत्रार्थः- ढ-रेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः। पुना रमते। हरी रम्यः। शम्भू राजते। अणः किम् ? तृढः। वृढः।

अहन् + अहः	अहन् + गणः
अहर् + अहः	अहर् + गणः
अहरहः	अहर्गणः

पुनर् + रमते	हरिर् + रम्यः	शम्भुर् + राजते
पुन + रमते	हरि + रम्यः	शम्भु + राजते
पुना + रमते	हरी + रम्यः	शम्भू + राजते

तृढ् + ढः	वृढ् + ढः	लिढ् + ढः
तृ + ढः	वृ + ढः	लि + ढः
तृढः	वृढः	लीढः

अ- आ
इ- ई
उ- ऊ

1.ढ्
2.र्

1.ढ्
2.र्

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

रो रि, हशि च इति सूत्रयोर्युगपत्प्राप्तौ व्यवस्थापनम्

लघुसिद्धान्तकौमुदी
(विसर्गसन्धिः)

- मनस् रथ इत्यत्र रुँत्वे कृते 'हशि चे'त्युत्वे 'रोरी'ति लोपे च प्राप्ते॥
- सूत्रम्- विप्रतिषेधे परं कार्यम् ॥ १,४.२॥
- सूत्रार्थः- तुल्यबलविरोधे परं कार्यं स्यात्। इति लोपे प्राप्ते।
- पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव। मनोरथः॥

मनस् + रथः

मनर् + रथः (स-सजुषो रुँः)

मन उ + रथः (पूर्वत्रासिद्धम्, हशि च)

मनोरथः

प्र.-कः तुल्यबलविरोधः?

उ.-परस्परविरोधिसूत्रयोः स्वस्वप्रवृत्तियोग्ये स्थले स्वतन्त्ररूपेण चरितार्थता, किन्तु एकत्र स्थले उभयोर्युगपत्प्राप्तिः तुल्यबलविरोधः।

हशि च (६.१.११४) → शिवो वन्द्यः

रो रि (८.३.१४) → पुना रमते

हशि च (६.१.११४) → मनर् + रथः ← रो रि (८.३.१४)

निष्कर्षः—सपादसप्ताध्यायी -त्रिपादी- सूत्रयोर्मध्ये विप्रतिषेधो न भवति।

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

विसर्गसन्धौ लोपः

लघुसिद्धान्तकौमुदी
(विसर्गसन्धिः)

- सूत्रम्- एतत्तदोः सुलोपोऽकोरनञ्समासे हलि॥६,१.१३२॥
- सूत्रार्थः- अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि , न तु नञ्समासे।
- एष विष्णुः। स शम्भुः। अकोः किम् ? एषको रुद्रः। अनञ्समासे किम् ? असः शिवः। हलि किम् ? एषोऽत्र॥

एषस् + विष्णुः   सस् + शम्भुः
एष विष्णुः   स शम्भुः

एषकस् + रुद्रः
एषकर् + रुद्रः
एषक उ + रुद्रः
एषको रुद्रः

असस् + शिवः
असर् + शिवः
अस : + शिवः
असस् + शिवः
असः शिवः असश्शिवः

एषस् + अत्र
एषर् + अत्र
एष उ + अत्र
एषो + अत्र
एषोऽत्र

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

विसर्गसन्धौ लोपः

लघुसिद्धान्तकौमुदी (विसर्गसन्धिः)

- सूत्रम्- सोऽचि लोपे चेत्पादपूरणम् ॥ ६,१.१३४॥
- सूत्रार्थः- स इत्यस्य = तद् इति शब्दसम्बन्धेः सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्य्येत= (यदि विनापि लोपं पादपूर्त्तिः संभवा तदा लोपो न भवति।)।

से1मा2मं3वि4ड्ढि5 प्र6भृं7तिं8 य9 ई10शिं11षे12 ॥

सै1ष2 दा3श4र5थी6 रा7मः8 ॥

॥ इति विसर्गसन्धिः॥

सैष दाशरथी रामः, सैष राजा युधिष्ठिरः।

प्रथमपादः — द्वितीयपादः

सैष कर्णो महादानी, सैष भीमो महाबलः॥

तृतीयपादः — चतुर्थपादः

सस् + इमामंविड्ढि प्रभृंतिं य ईशिंषे (जगतीच्छन्दः)

स + इमामंविड्ढि प्रभृंतिं य ईशिंषे

सेमामंविड्ढि प्रभृंतिं य ईशिंषे (ऋग्वेदः-२.२४.१)

सस् + एष दाशरथी रामः

स + एष दाशरथी रामः

सैष दाशरथी रामः (अनुष्टुभ्/ पथ्यावक्त्रच्छन्दः)

विसर्गसन्धेः परीक्षणम्

१. शुद्धं रूपं चिनुत—

क. विष्णुस्त्राता

ख. विष्णुःत्राता

ग. उभयम्

घ. विष्णुष्त्राता

२. ‘खरवसानयोर्विसर्जनीयः’ सूत्रविषये इदं कथनं पूर्णतः सत्यम्—

क. खरि परे सर्वत्र पदान्तरेफस्थाने नित्यं विसर्गश्रवणं भवति।

ख. शरि भिन्ने खरि परतः विकल्पेन विसर्गो भवति।

ग. अवसाने सर्वदा पदान्तरेफस्य स्थाने विसर्ग एव भवति।

घ. अनेन सर्वदा रोरेव रेफस्यविसर्गो भवति।

३. ‘वा शरि’ इति सूत्रेण भवति—

क. विसर्गः

ख. विसर्गस्य स्थाने विसर्गः

ग. सकारः

घ. शकारः

४. अशुद्धं रूपं चिनुत—

क. रामो राजमणिः

ख. बालः करोति

ग. पुरुषश्चिनोति

घ. बुधस्टीकते

५. ‘ससजुषो रुँः’ इति सूत्रविषये इदं कथनमशुद्धम्—

क. अनेन पदान्तस्य सस्य स्थाने रुँ भवति।

ख. अनेन पदान्तस्य षस्य स्थाने रुँ भवति।

ग. अनेन सजुषः षस्य स्थाने रुँ भवति।

घ. रुँ इत्यस्य ‘र्’ शेषो भवति।

६. ‘अतो रोरप्लुतादप्लुते’ सूत्रविषये इदं कथनं पूर्णतः शुद्धम्—

क. अनेन रुँ-स्थाने रुँ भवति अति परे।

ख. अनेन रुँ स्थाने उ भवति।

ग. अप्लुतादतः परस्य रोरुः स्याद् अति परे।

घ. अप्लुतादतः परस्य रोरुः स्याद् अप्लुते अति परे।

७. एतेषु ‘हशि च’ इति सूत्रस्य प्रवृत्तिः कुत्रास्ति—

क. शुद्धोऽहम्।

ख. नरो गच्छति।

ग. ततोऽन्यथा।

घ. नृपश्शेते।

८. **‘भो-भगो-अघो अपूर्वस्य योऽशि’ इति सूत्रेण किं भवति?**

क. रोः स्थाने यादेशः।

ख. रोर्लोपः।

ग. रोः स्थाने विसर्गादेशः।

घ. रोः स्थाने अशादेशः।

९. **‘हलि सर्वेषाम्’ सूत्रेण किं भवति?**

क. यकारलोपः।

ख. यस्य कस्यापि लोपः।

ग. भोभगो-अघो-अपूर्वकविसर्गः।

घ. सर्वेषां हलां लोपः।

१०. **‘भो +देवाः’ इत्यस्य शुद्धा प्रक्रिया अस्ति—**

क. भस् + देवाः इत्यस्य रुँत्वे उत्वे गुणे च कृते सिद्धम्।

ख. भोस् + देवाः ‘हलि सर्वेषाम्’ इत्यनेन सकारस्य लोपे सिद्धम्।

ग. भोस् + देवाः रुँत्वे उत्वे ‘हलि सर्वेषाम्’ इति लोपे कृते सिद्धम्।

घ. भोस् + देवाः रुँत्वे यत्वे ‘हलि सर्वेषाम्’ इति यलोपे कृते सिद्धम्।

११. **विसर्गसन्धौ कृते समीचीनम् अस्ति—**

क. ताराः उदिताः

ख. तारा उदिताः

ग. तारोदिताः

घ. तारावुदिताः

१२. **विसर्गसन्धौ कृते शुद्धमस्ति—**

क. बालिका धावन्ति।

ख. बालिकाः धावन्ति।

ग. बालिकास्धावन्ति ।

घ. बालिको धावन्ति।

१३. **‘अहरहः’ इत्यस्य विच्छेदोऽस्ति—**

क. अहन् + अहन्

ख. अहस्+ अहस्

ग. अहस्+ अहः

घ. अहो+ अहः

१४. **अहन्+ गणः अत्र सन्धौ कृते किं रूपम् ?**

क. अहन्गणः

ख. अहग्गणः

ग. अहः गणः

घ. अहर्गणः

१५. 'पुना रमते' इत्यत्र केन दीर्घः?

क. ढ्रलोपे पूर्वस्य दीर्घोऽणः

ख. दीर्घोऽकितः

ग. अकः सवर्णे दीर्घः

घ. रो रि

१६. 'शम्भू राजते' अस्य विच्छेदोऽस्ति—

क. शम्भून्+ राजते

ख. शम्भुस्+ राजते

ग. शम्भूस् + राजते

घ. शम्भो + राजते

१७. 'ढ्रलोपे' पूर्वस्य दीर्घोऽणः अस्य सूत्रविषये इदं कथनं पूर्णतः सत्यं नास्ति—

क. अनेन सूत्रेण 'अ इ उ' इत्येषां दीर्घो भवति।

ख. अनेन सूत्रेण ढकार-रेफलोपयोर्निमित्ते परे दीर्घो भवति।

ग. अनेन सूत्रेण हरी+ रम्यः इत्यत्र दीर्घो भवति।

घ. इदं सूत्रं 'रो रि' सूत्रात्प्राक्प्रवर्तते।

१८. 'मनोरथः' इत्यस्य समीचीनः प्रक्रियाक्रमो वर्तते—

क. मनस्+ रथः— रुँत्वे उत्वे दीर्घे च कृते मनोरथःसिद्धम्।

ख. मनर्+ रथः— 'रो रि' इति लोपे गुणे च कृते मनोरथः सिद्धम्।

ग. मनस्+ रथः— रुँत्वे उत्वे गुणे च कृते मनोरथः सिद्धम्।

घ. मनर्+ रथः— उत्वे लोपे च कृते मनोरथः सिद्धम्।

१९. 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' इति सूत्रविषये इदं कथनम् असत्यं नास्ति—

क. अनेन सूत्रेण यकारस्य लोपो भवति।

ख. अनेन सूत्रेण सोस्सकारस्य लोपो भवति।

ग. अनेन सूत्रेण एतत्तदोर्दकारस्य लोपो भवति।

घ. अनेन सूत्रेण विसर्गस्य लोपो भवति।

२०. एषु एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इति सूत्रं कुत्र प्रवर्तते—

क. असः शिवः

ख. स आगतः

ग. एष धावति

घ. एषोऽत्र

२१. 'सोऽचि लोपे चेत्पादपूरणम्' इति सूत्रविषये इदं कथनं सत्यं नास्ति—

क. अनेन 'तद्' शब्दसम्बन्धेः सोर्लोपो भवति।

ख. अनेन अचि परे एव सोर्लोपो विधीयते।

ग. 'तद्' शब्दसम्बन्धिलोपः तदा एव प्रवर्त्तते यदा लोपे सत्येव पादपूर्तिः भवति।

घ. 'सैष दाशरथी रामः' इत्यत्रेदं सूत्रं न प्रवर्तते।

२२. अधोलिखितेषु शुद्धं रूपं चिनुत—

क. मनोस्थितिः

ख. मनःस्थितिः

ग. मन स्थितिः

घ. मनस्थितिः

२३. प्रातर्गच्छति इत्यस्य विच्छेदोऽस्ति—

क. प्रातर् + गच्छति

ख. प्रातस् + गच्छति

ग. प्रातः + गच्छति

घ. प्रातृ + गच्छति

२४. शुद्धं वाक्यं चिनुत—

क. बालिकास्दीव्यन्ति ।

ख. बालको गच्छति।

ग. कपिः रौति।

घ. पुनः हसन्ति।

२५. मोक्षो रजस्तमोऽभावाद् बलवत्कर्मसंक्षयात्।
वियोगो सर्वसंयोगैरपुनर्भव उच्यते॥
अस्मिन् पद्ये कुत्र विसर्गसन्धिसम्बन्धिदोषोऽस्ति—

क. प्रथमपादे

ख. द्वितीयपादे

ग. तृतीयपादे

घ. चतुर्थपादे

उत्तराणि— १-क २-ग ३-ख ४-घ ५-ख ६-घ ७-ख ८-क ९-क १०-घ ११-ख १२-क १३-क १४-घ १५-क १६-ख १७-घ १८-ग १९-ख २०-ग २१-घ २२-ख २३-क २४-घ २५-ग

विसर्गसन्धिप्रकरणस्य facebook_videos_links

१. विसर्गस्य विभिन्नाः दश विपरिणामाः, तस्योत्पत्तेर्मूलं कारणम्।

२. विसर्गसन्धौ (स्,श्, ष्, :) इत्येषां प्रयोगविज्ञानम्। ससजुषो रुँः, विसर्जनीयस्य सः।

३. विसर्गसन्धौ ओकारस्य रेफस्य च स्थितिः। अतो रोरप्लुतादप्लुते, हशि च।

४. विसर्गसन्धौ यकारस्य लोपस्य च स्थितिः। भोभगोअघोअपूर्वस्य योऽशि, हलि सर्वेषाम्।

५. विसर्गसन्धौ रेफः लोपश्च। रोऽसुपि, रो रि, ढ्रलोपे पूर्वस्य दीर्घोऽणः।

६. रो रि, हशि च इत्यनयोर्युगपत्प्राप्तौ व्यवस्थापनम्। एतत्तदोः सुलोपोऽकोर्नञ्समासे हलि।

७. विसर्गसन्धौ तदिति सोर्लोपः, सोऽचि लोपे चेत्पादपूरणम्।

८. विसर्गसन्धेः परीक्षणम्।

सूचना— जिस कक्षा के ऊपर क्लिक् करेंगे वह वीडियो खुलेगा। इसके लिए इंटरनेट जुड़ा होना आवश्यक है।